ततो मण्डलबाह्ये तु प्राच्यां वै प्राङ्मुखः स्थितः ॥ ११ ॥
आचार्यो गृह्य संभारान् ग्रहार्द्री[11]स्तर्पयेत् सुरान्।
घृतैस्तिलैर्यवैर्मन्त्री ब्रह्मादींस्तर्पयेत् ततः ॥ १२ ॥
प्रजेशं तर्पयेद् विद्वान् आहुतीनां शतेन च[12]।
इतरान् दशभिर्देवान् आहुतीभिः प्रतर्पयेत् ॥ १३ ॥
दद्यात् पूर्णाहुतिं पश्चाद् वौषडन्तेन मन्त्रवित्।
ततः प्रणम्य विज्ञाप्य कृत्वा वै स्वस्तिवाचनम् ॥ १४ ॥
प्रगृह्य कर्करीं सम्यङ् मण्डलं तु प्रदक्षिणम्।
सूत्रमार्गेण देवेश तोयाधारांस्तु भ्रामयेत् ॥ १५ ॥
पूर्ववत् तेन मार्गेण सप्तबीजानि भ्रामयेत्[13]।
सुशोभनं शुभस्थानं तथा खातस्य कारयेत्[14] ॥ १६ ॥
ततो गर्तं खनेन्मध्ये[15] हस्तमात्रं प्रमाणतः।
चतुरङ्गुलमात्रं तद् अधः[16]खन्यात् सुसम्मितम् ॥ १७ ॥
गोमयेनोप[17]लिप्याथ चन्दनेन विभूषयेत्।
मध्ये दत्त्वा तु पुष्पाणि शुक्ला § न्यक्षतमेव च ॥ १८ ॥

[8] सुसम्पन्नम् —B,C. * गन्धपुष्पै—D. [9] गन्ध —A,D. [10] नैवेद्यै श्च —B,C. [11] ब्रह्मा तु—B,C.; ब्रह्मादीन् वैदिकसर्वस्व. [12] च —B,C. [13] संलिखेद् —B,C. [14] This line is omitted in A. [15] मूमौ—B,C.; स्मार्त भट्टाचार्य; देवीपुराण cited in वास्तुयागतत्त्व reads मध्य। [16] तु ह्यधः—B,C. [17] गोमयेन विलिप्याथ -B,C. § शुद्धा—D.

आचार्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतुर्भुजम् ।
तूर्यमङ्गल्यघोषेण ब्रह्मघोषवरेण च ॥ १९ ॥
अर्घ्यं दद्यात् सुरश्रेष्ठ कुम्भतोयेन मन्त्रवित् ।
प्रगृह्य कर्करीं तावत् तद्गर्तं[18] पूरयेज् जलैः ॥ २० ॥
सर्वरत्नसमाकीर्णैर्विमलैः सुसुगन्धिभिः ।
तस्मिन् शुक्लानि पुष्पाणि प्रक्षिपेद् ओमिति स्मरन् ॥ २१ ॥
तदावर्तं परीक्षेत वेदाद्येनाक्षतं क्षिपेत् ।
शुभं स्याद् दक्षिणावर्तेऽशुभं वामे भवेत् ततः ॥ २२ ॥
बीजैः शालियवादीनां तं गर्तं पूरयेद् बुधः[19] ।
क्षेत्रजाभिः पवित्राभिर्मृद्भिर्गर्तं प्रपूरयेत् ॥ २३ ॥
एवं निष्पाद्य विधिना चार्घ्यदानं सुरोत्तम ।
सुवर्णं गां वस्त्रयुग्ममाचार्याय निवेदयेत् ॥ २४ ॥
कालज्ञस्थपती पूज्यौ वैष्णवान् शक्तितोऽर्चयेत् ।
ब्राह्मणान् भोजयित्वा च[20] गेयनृत्यादि[21] कारयेत् ॥ २५ ॥
ततस्तं खातयेद्[22] यत्नाज् जलान्तं यावदेव तु ।
पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् ॥ २६ ॥
प्रासादे दोषदं शल्यं भवेद् यावज्जलान्तिकम् ।
तस्मात् प्रासादिकी भूमिः शोध्या यावज्जलान्तिकम् ॥ २७ ॥
शिलान्तं कर्करान्तं वा यावद् वा भूः[23] कुमारिका ।
आकोट्य तां समीकृत्य ततो यागं[24] समारभेत्[25] ॥ २८ ॥
॥ १० ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे दशमोऽर्घ्यदानपटलः ॥ १० ॥

[18] सूत्रं—A. [19] ततः—B,C. [20] तु—B,C. [21] नृत्यगीतादि—B,C. [22] संक्षालयेद्—B,C. [23] भूर्वा—B,C. [24] यज्ञं—B,C. [25] समाचरेत्—B,C.

एकादशः पटलः

श्रीभगवान् उवाच—

अतः परं प्रवक्ष्यामि प्रतिष्ठां पादसंज्ञिताम्[1]।
अग्रतो मण्डपः कार्यश्चतुरस्रः सवेदिकः॥ १॥
दशद्वादशहस्तो[2] वा चतुर्भागायतः शुभः।
पताकाभिर्ध्वजैश्चित्रैः कदलीभिर्विभूषयेत्॥ २॥
कुण्डानि कुर्याच् चत्वारि तोरणानि यथाक्रमम्।
कुम्मन्यासेष्टकान्यासौ[3] द्वारस्तम्भौ व्रतं तथा[4]॥ ३॥
सर्वमेतत् तु कुर्वीत दिवसे तु सुशोभने।
सर्वेष्वेव तु कर्तव्यं देवब्राह्मणपूजनम्॥ ४॥
कालज्ञपूजनं चैव स्थपतीनां च पूजनम्।
वास्तुकर्म न चारभ्यं वर्षाकाले विजानता॥ ५॥
कृष्णपक्षे त्रिभागान्ते शुक्लस्यादौ द्वितीयके।
चतुर्थीं नवमीं वर्ज्य तिथिं चापि चतुर्दशीम्॥ ६॥
भौमस्य तु दिनं वर्ज्यं करणं विष्टिसंज्ञितम्।
क्षित्यन्तरीक्षदिव्योत्थैरुत्पातैर्भयपीडितम्॥ ७॥
उपसृष्टं ग्रहैर्भं च व्यतीपातहतं तथा।
चन्द्रतारानुकूले च[5] कार्य्यं कर्म विजानता॥ ८॥
ध्रुवाणि चात्र शस्तानि नैर्ऋतं शक्रदैवतम्।
पुष्यं पौष्णं च सावित्रं वायव्यं वैष्णवं तथा॥ ९॥
स्थिरांशे च स्थिरे लग्ने कर्तुश्चोपचयात्मके।
केन्द्रे सौम्यो ग्रहो यस्य त्रिकोणे च[6] सुरत्तम॥ १०॥
पापाश्चोपचयस्थाने(a) तदा कार्यं समाचरेत्।
यत्नेन वर्जयेत् पापं केन्द्रस्थं सर्वकर्मसु॥ ११॥

[1] —संश्रिताम्—A. [2] —हस्ता—A. [3] —न्यासे—B,C.; ...न्यासेष्टका—dropped in D. [4] तोरणाश्रयमेव हि—B,C. [5] तु—B,C. [6] तु—B,C,D. (a) पापाश्चापचयस्थाने ?

सौम्ययुक्ते तु यत् केन्द्रं तादृक् पत्रं तु शून्यकम्[7] ।
पूरयेत्[8] खातकं यत्नात् पादं पादं यथाक्रमम् ॥ १२ ॥
अष्टाङ्गुलं मृत्तिकया हस्तकं[9] चेष्टकादिभिः ।
सिक्त्वा सिक्त्वा तु तोयेन कलसैः काञ्चनादिभिः ॥ १३ ॥
आकोटनं ततः कुर्याद् मुद्गरैर्ब्रह्मवृक्षजैः ।
पादोनं पूरयेत् खातं सुषमं* चैव कारयेत् ॥ १४ ॥

... .

देशिकः पञ्चगव्येन तां भूमिं प्रोक्षयेद् बुधः १५ ॥
सुवर्णव्रीहिगर्भेण चूतपल्लवशोभिना ।
तीर्थतोयप्रपूर्णेण § स्वर्णताम्रमयेन वा ॥ १६ ॥
सेचयेदभिजप्तेन वारिणा कलसेन तु ।
ततः शुद्धा भवेद् भूमिर्दोषयुक्तापि या भवेत् ॥ १७ ॥
एवं भूमिं विशोध्याथ ततो वास्तुं यजेद् बुधः ।
ब्रह्मस्थानं स्थिरीकृत्य इष्टकाग्रहणं ततः ॥ १८ ॥
इष्टकानां प्रमाणं च लक्षणं साम्प्रतम् शृणु ।
सुतला लक्षणोपेता द्वादशाङ्गुलसम्मिता ॥ १९ ॥
सुविस्तारविभागेन नैपुण्येन च सम्मिता ।
सुपक्वाः सुप्रमाणास्ता एकवर्णा मनोहराः ॥ २० ॥
विमला इष्टकाः कार्याश्चतुरस्राः सुसम्मिताः ।
छिन्नकर्णाश्चाप्रशस्ताः[10] पाणिपादविवर्जिताः ॥ २१ ॥
सशर्कराः कृष्णवर्णा अस्थ्यङ्गारचिताश्च याः ।
विवर्णा मन्दगन्धाश्च याः पीनाः पिण्डिकाश्च[11] याः ॥ २२ ॥

[7] सौम्ययुक्तं तु पक्षेन्द्रं तज्ज्ञेयं न तु खल्पकम्—B,C. [8] पूरके—A. [9] हास्तिकं—A,D. * सुसमं—D. § सुपूर्णेन—D. [10] छिन्नकर्णा ह्यप्रशस्ताः—B,C. [11] पिण्डका—B,C.; the citation in वैदिकसर्वस्व reads—विवर्णा मन्दपक्वाश्च नेष्टा सा खण्डिता तु या; विवर्णा मन्दगन्धा च या पीना पिण्डिका तु या—D.

हीनाश्च विषमा भग्ना जर्जराश्च विवर्जिताः[क]।
कर्तव्यस्त्विष्टकान्यासः [प्रासादे चेष्टकामये ॥ २३ ॥
शैले शिलानां विन्यासः] कार्कैरे[12] कर्करां[13] न्यसेत्।
नवैव[14] परिगृह्णीयात् ताम्रकुम्भान् सुशोभनान् ॥ २४ ॥
आहृत्य सर्वसम्भारान् इष्टकामधिवासयेत्।
ऐशान्यां मण्डपं[15] कृत्वा तद्वत् प्राच्यां[16] तु मण्डपम् ॥ २५ ॥
कुम्भाना*मिष्टकानां च ततः स्नानं समाचरेत्।
अथ पञ्चकषायेण सर्वौषधिजलेन च ॥ २६ ॥
गन्धतोयेन च तथा कुम्भैस्तोयप्रपूरितैः[17]।
हिरण्यव्रीहिसंयुक्तैर्गन्धचन्दनचर्चितैः ॥ २७ ॥
"आपो हि ष्ठे" ति तिसृभिः "शन्नो देवी" ति चाप्यथ।
"तरत्समन्दी" ति तथा "पावमानी" भिरेव च[18] ॥ २८ ॥
"उदुत्तमं वरुणे" ति "इमं मे" ति तथैव च।
"वरणस्ये" (?) § ति मन्त्रेण "हंसः शुचिसद्"[(b)] त्यपि ॥ २९ ॥
श्रीसूक्तेन तथा कुम्भैः स्नापयेदिष्टकान् तथा।
"श्रायन्ती"यं पठन् सूक्तं कुम्भांस्तान् स्नापयेद्[19] बुधः ॥ ३० ॥
ततोऽनुलेपनं कार्यं चन्दनेन सुगन्धिना।
आच्छादनं ततः कुर्याद् वासोभिः कुसुमैस्ततः[20] ॥ ३१ ॥
शय्यायां तु प्रकृष्टायां मण्डपे स्थाप्य पूजयेत्।
नानाभक्ष्यौदनैश्चैव गन्धैः पुष्पैर्मनोहरैः ॥ ३२ ॥
धूपं दीपं च नैवेद्यं तेषां यत्नान्निवेदयेत्।
एवं कृत्वा ततः सम्यग् इष्टकाहोममाचरेत् ॥ ३३ ॥

[क] हीना च ..जर्जरा च—D. [ ] This portion is omitted in D. [12] कर्करे—B,C. [13] कर्करा—A. [14] नवैवं -B,C. [15] मण्डलं—B,C. [16] स्नपनार्थाय—B,C. * कृष्टानां—citation in the वैदिकसर्वस्व। [17] सुपूरितैः—A. [18] This line is omitted in A. § वरुणस्येति ? —Atharvaveda, X. 5. 10. (b) 'शुचिषद्' seems to be the proper reading. [19] स्थापयेद्—B,C. [20] तथा—B,C.

तस्मिंस्तु मण्डपे लिख्य वैष्णवं* मण्डलं शुभम् ।
विष्णुं[21] समर्चयेत् तत्र कुण्डेऽग्निं जुहुयात् ततः ॥ ३४ ॥
वैष्णवाग्निं जनित्वादौ[22] यथाविधि समाहितः ।
कुर्याच् च समिधाधानं द्वादशाक्षरविद्यया ॥ ३५ ॥
आघारा[ख]वाज्यभागौ तु प्रणवेनैव कारयेत् ।
अष्टाक्षरैस्ततो व्यस्तैः कुर्यादष्टाहुतीः क्रमात् ॥ ३६ ॥
आज्यं व्याहृतिभि[23]र्हुत्वा लोकेशानां क्रमेण तु ।
अग्नये चैव सोमाय ग्रहेभ्य इति चैव हि ॥ ३७ ॥
"पुरुषोत्तमायेति" हुत्वा व्याहृती[24]र्जुहुयात् ततः ।
प्रायश्चित्तं ततो हुत्वा दद्यात् पूर्णाहुतिं ततः ॥ ३८ ॥
द्वादशाक्षरमन्त्रेण वेदाद्यैरथवानघ ।
कुण्डेषु मूर्तिपाः सम्यग् जुहुयुः सघृतांस्तिलान् ॥ ३९ ॥
॥ ११ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
एकादशः शिलाधिवासनपटलः ॥ ११ ॥

द्वादशः पटलः

श्रीभगवान् उवाच—

कुम्भन्यासं ततः कुर्यादिष्टकान्यासमेव च ।
देशिकः प्राङ्मुखो भूत्वा सर्वालङ्कारभूषितः ॥ १ ॥
विलिप्य गोमयैर्भूमिं विन्यसेत् कलसान् नव ।
अष्टदिक्षु यथान्यायं मध्ये चैकं तथा न्यसेत् ॥ २ ॥

*भद्राख्यं—वैदिकसर्वस्व । [21] विष्णुमभ्यर्चयेत् –B,C. [22] जनेदादौ—B,C. [ख] अघारा –D.
[23] स्वाकृतिभि—A. [24] व्याहृतिभिः—B,C.

पञ्चरत्नसमायुक्तान् मङ्गलौषधिसंयुतान्[1]।
पारदेन समायुक्तान् कृत्वा वस्त्रेण भूषितान्[2] ॥ ३ ॥
पद्मं[3] चैव महापद्मं मकरं कच्छपं तथा।
मुकुन्दं च तथानन्दं नीलं शङ्खं च पद्मिनीम् ॥ ४ ॥
एतास्तु देवताः कुम्भे न्यसनीया यथाक्रमम्।
एवं विन्यस्य कलसान् पुनर्नैतान् प्र[4]चालयेत् ॥ ५ ॥
कुम्भस्योपरि विन्यस्य इष्टकाष्टौ यथाक्रमम्।
ऐशाने च तथा कोणे इष्टकां प्रथमां[5] न्यसेत् ॥ ६ ॥
प्रदक्षिणं ततो देव इष्टकान्यास उच्यते।
शक्तयो विमलाद्यास्तु इष्टकानां तु देवताः ॥ ७ ॥
न्यसनीया यथान्यायं मध्ये न्यस्यास्त्वनुग्रहा।
"अव्यङ्गे चाक्षते पूर्णे मुनेरङ्गिरसः सुते ॥ ८ ॥
इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहम्।"
मन्त्रेणानेन विन्यस्य इष्टकां देशिकोत्तमः ॥ ९ ॥
गर्भाधानं ततः कुर्यान्मध्यस्थाने समाहितः।
कुम्भोपरिष्टाद् देवेश पद्मिनी यस्य देवता ॥ १० ॥
गृह्णीयान्मृत्तिकां देव दशस्थानेषु देशिकः।
समुद्रे पर्वते नद्यां ह्रदे तीर्थे खले तथा ॥ ११ ॥
कुलीरवासे वल्मीके विषाणाग्रे वृषस्य च।
कुञ्जरस्य विषाणाग्रे स्थानेष्वेषु पृथक् पृथक् ॥ १२ ॥
रक्तोत्पलस्य पद्मस्य तथा नीलोत्पलस्य च।
कुमुदस्य सुरश्रेष्ठ गृह्णीयान्मूलमुत्तमम् ॥ १३ ॥
मनःशिलां सीसकं च हरितालं रसाञ्जनम्।
सौराष्ट्रीं रोचनां गन्धं पारदं गैरिकं तथा ॥ १४ ॥

[1] This line is omitted in B. [2] वेष्टितान्—B,C. [3] शङ्खं—A. [4] न चालयेत्—B,C. [5] प्रथमं—B,C. [6] तथा—B,C,D.

वज्रं[7] च मौक्तिकं चैव वैदूर्यं शङ्खमेव च।
स्फटिकं पुष्परागं च चन्द्रकान्तं तथैव च ॥ १५ ॥

....

महानीलं पद्मरागं गृह्णीयाद् यत्नतो बुधः ॥ १६ ॥
शालिनीवारनिष्पावयवमुद्गकुलत्थकान्।
तिलगोधूमकुल्मापान् गृह्णीयाद् देशिकोत्तमः ॥ १७ ॥
सुवर्णं रजतं शुल्व[8]मायसं त्रपुकं तथा।
कूर्मं शेषं तथा पद्मं शङ्खं चक्रं तथा धनुः ॥ १८ ॥
गदां चैव महाभाग सर्वं कुर्याद्धिरण्मयम्।
सर्वमेतत्[9] समानीय न्यसेद् वै गर्भभाजने ॥ १९ ॥
द्वादशाङ्गुलविस्तारं चतुरङ्गुलमुच्छ्रितम्।
श्लक्ष्णमस्फुटितं चैव पद्माकारं सुशोभनम् ॥ २० ॥
चान्द्रं रौप्यं तथा शौल्वं[10] प्रशस्तं गर्भभाजनम्।
ब्रह्मस्थाने तु यत् कुम्भं न्यस्तं श्रीदैवतं पुरा ॥ २१ ॥
तदूर्ध्वं नेत्रपट्टं च[11] दत्त्वा गोमूत्रप्रोक्षणम्[12]।
तदूर्ध्वं ब्राह्मणानां तु विन्यसेद् गर्भभा[13]जनम् ॥ २२ ॥
क्षत्रियाणां विशां चैव शूद्राणां च पटं विना।
विमलं भाजनं कृत्वा पञ्चगव्येन शोधयेत् ॥ २३ ॥
हस्ताभ्यां परिगृह्याथ तस्मिन्नेव विचिन्तयेत्।
अथ भूमण्डलं सर्वं ससमुद्रं [14]सपर्वतम् ॥ २४ ॥
दिग्द्विपेन्द्रसमायुक्तमनन्तस्योपरिस्थितम्।
एवं ध्यात्वा तु पृथिवीं भाजनो[15]परि कल्पयेत् ॥ २५ ॥
मृदं समुद्रजां गृह्य वृत्तिं[16] कुर्यात् प्रदक्षिणम्।
पार्वती पूर्वतः कार्या नदीजा दक्षिणे तथा ॥ २६ ॥

[7] रक्तं—A [8] शुल्कं—B,C. [9] एतं—A. [10] शुल्वं—A,D. [11] तु—B,C. [12] प्रोक्षितम्—B,C,D. [13] दर्भ—B; कुम्भ—C. [14] सपवित्रं—C. [15] भाजन—B,C. [16] वृत्तं—A,D.

ह्रदजा पश्चिमे भागे तीर्थजा चोत्तरे तथा[क]।
आग्नेय्यां खलजा कार्या नैर्ऋत्यां तु कुलीरजा ॥ २७ ॥
वल्मीकजा तु वायव्यामैशान्यां वृषशृङ्गजा।
नागदन्तोद्भवा मध्ये न्यसनीया यथाक्रमम् ॥ २८ ॥
रक्तोत्पलस्य पूर्वे तु दक्षिणे पद्ममूलकम्।
प्रत्यङ्नीलोत्पलस्योक्तमुत्तरे कुमुदस्य च ॥ २९ ॥
मनःशिलादि धातूनि पूर्वादिक्रमतो न्यसेत्।
वज्रादिरत्नजातानि तेनैव क्रमयोगतः ॥ ३० ॥
शाल्यादीनि च बीजानि तत्रैव विनि[17]योजयेत्।
सुवर्णं पूर्वतः कार्यं रजतं दक्षिणे तथा ॥ ३१ ॥
आयसं पश्चिमे भागे त्रपुकं चोत्तरे तथा।
आग्नेय्यां कूर्मरूपं तु अनन्तं नैर्ऋते तथा ॥ ३२ ॥
वायव्यामथ पद्मं तु शङ्खमीशानगोचरे[ख]।
धनुश्चक्रं गदां चैव ब्रह्मस्थाने निवेशयेत् ॥ ३३ ॥
एवं कृत्वा समायोगं[18] प्रोक्ष्य द्वादशविद्यया।
अथ[19] दक्षिणतः स्थाप्य होमकर्म समारभेत् ॥ ३४ ॥
द्वादशाज्या[20]हुतिं हुत्वा द्वादशाक्षरविद्यया।
तथाष्टलोकपालेभ्यस्तथा नारायणाय च ॥ ३५ ॥
बीजेभ्यः[21] सर्वधातुभ्यः सर्वलोकेभ्य एव च।
नदीसमुद्रतीर्थेभ्यः पर्वतेभ्यस्तथैव च ॥ ३६ ॥
ह्रदेभ्यश्च गणेभ्यश्च पातालेभ्यस्तथैव च[22]।
वृषेभ्यो दिग्गजेभ्यश्च नागेभ्यः सुर[23]सत्तम ॥ ३७ ॥

[क] यथा—D. [17] समयोजयेत्—A. [ख] ‘‘‘मीशान एव च—A,B,C. [18] समायुक्तं—B,C. [19] अथो —B,C,D. [20] द्वादशाज्याहुतीः—B,C. [21] सर्वेभ्यः—B,C. [22] B omits this line. [23] नागेभ्यश्च सुरोत्तम—B,C,

व्याहृत्या[24] चापि जुहुयात् स्वाहाकारान्तयुक्तया ।
प्रतिपत्त्या[25]हुतिं कुर्यात् संपातविधिनैव च ॥ ३८ ॥
गर्भभाजनमध्ये तु संपाताज्यं समापयेत् ।
पिधाय भाजनं तप्तं[26] गृहीत्वाग्रकरेण च ॥ ३९ ॥
जपेदष्टाक्षरं मन्त्रं द्वादशाक्षमेव च ।
जप्त्वा च प्राङ्मुखो भूत्वा ध्यायेच्[27] च मनसा भुवम् ॥ ४० ॥
ध्यात्वा तु सकलां भूमिमिमं मन्त्रमुदीरयेत् ।
"एकान्ते सर्वभूभागे पर्वतासनमण्डिते ॥ ४१ ॥
समुद्रपरिधाने त्वं देवि गर्भं समाचर[28] ।
नन्दे नन्दय वाशिष्ठे वसुभिः प्रजया सह ॥ ४२ ॥
जये भार्गव*-दायादे प्रजानां विजयावहे ।
पूर्णेऽङ्गिरसदायादे पूर्णकामं कुरुष्व माम् ॥ ४३ ॥
भद्रे काश्यपदायादे कुरु भद्रां मतिं मम ।
सर्वबीजसमायुक्ते सर्वरत्नौषधीवृते ॥ ४४ ॥
जयस्व रुचिरे नन्दे वाशिष्ठे रम्यतामिह ।
प्रजापतिसुते देवि चतुरस्रे महीयसि ॥ ४५ ॥
सुभगे सुप्रदे भद्रे गृहे काश्यपि रम्यताम् ।
पूजिते परमाचार्यैर्गन्धमाल्यैरलङ्कृते ॥ ४६ ॥
भव भूतिकरी देवि गृहे भार्गवि रम्यताम् ।
[अव्यक्ते चाक्षते पूर्णे मुनेरङ्गिरसः सुते ॥ ४७ ॥
इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहम् ।][29]
देशस्वामि-पुरस्वामि-गृहस्वामि-परिग्रहे ॥ ४८ ॥
मनुष्यधनहस्त्यश्व-पशुवृद्धिकरी भव ।"
एवमुक्त्वा ततः श्वभ्रं गोमूत्रेण तु प्रोक्षितम् ॥ ४९ ॥

[24] आहुत्या—A.　[25] प्रतिपाद्या—B,C.　[26] तन्तु—B,C,D.　[27] ध्यात्वा—B,C.
[28] समाश्रय—C,D.　* भार्गवि—D.　[29] These two lines are omitted in B,C.

कृत्वा नियमयेद्[30] गर्भं[31] सर्वकल्याणसंयुतम् ।
गर्भाधानं भवेद् रात्रौ सुवर्णं दक्षिणा भवेत् ॥ ५० ॥
तथा पयस्विनीं गां च वस्त्रयुग्मं तथैव च ।
मूर्तिपानां च दातव्या तथा धेनुः पयस्विनी ॥ ५१ ॥
एवं गर्भं तु विन्यस्य तदूर्ध्वं नवमिष्टकाम्[(a)] ।
यस्य यन्त्रावृतो[32] गर्भमिष्टकाभिस्तु पूरयेत् ॥ ५२ ॥
पीठबन्धमतः कुर्यान्महा[33]प्रासादमानतः ।
पीठोत्तमं चोच्छ्रयेण प्रासादस्यार्धमानतः ॥ ५३ ॥
पादहीनं मध्यमं स्यात् कन्यसं चोर्ध्वमानतः ।
उत्तमं वासुदेवस्य कुर्यात् पीठं विचक्षणः ॥ ५४ ॥
अन्येषां स्वेच्छया कुर्यात् पीठं शृणु विशेषतः ।
चतुर्मुखेशसूर्याणामुत्तमं पीठमुच्यते ॥ ५५ ॥
पीठबन्धोपरिष्टात् तु वास्तुयज्ञं पुनर्यजेत् ।
य इमां सकलां कुर्यात् प्रतिष्ठां पादसं[34]श्रिताम् ॥ ५६ ॥
सर्वपाप[35]विनिर्मुक्तो विष्णुलोके महीयते ।
मरणं च[36] व्रजेन्मर्त्यो यः कृत्वा प्रथमेष्टकाम् ॥ ५७ ॥
स समाप्तस्य यज्ञस्य फलमाप्नोत्यसंशयः ।
देवागारं करोमीति मनसा यस्तु चिन्तयेत् ॥ ५८ ॥
तस्य कायगतं पापं तदह्ना[37] विप्रणश्यति ।
कृते तु किं पुनस्तस्य प्रासादं विधिनैव तु ॥ ५९ ॥
अष्टेष्टकासमायुक्तं यः कुर्याद् वैष्णवं गृहम् ।
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित् ॥ ६० ॥

[30] निधापयेद्—B,C. [31] गर्तं—A. (a) नवम् is apparently a solecism for नवाम् । [32] यस्य seems to be a scribal error for न्यस्य ; वस्त्रावृतो—B,C. यन्त्रावृतं ? [33] महत्—A. [34] संज्ञिताम्—B,C. [35] सर्वपापैर्विनिर्मुक्तो—B,C. [36] न—A. [37] तदग्रे—B,C.

अनेनैवानुमेयं हि फलं प्रासादविस्तरात् ।
ग्राममध्ये च पूर्वे च प्रत्यगद्वारं प्रकल्पयेत् ॥ ६१ ॥
विदिशासु च सर्वासु तथा प्रत्यङ्मुखं भवेत् ।
दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखं भवेत् ॥ ६२ ॥
॥ १२ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे द्वादशः पातालयागपटलः ॥ १२ ॥

त्रयोदशः पटलः

श्रीभगवान् उवाच—

प्रासादं संप्रवक्ष्यामि सर्वसाधारणं शृणु ।
चतुरस्रीकृतं क्षेत्रं भजेत्[1] षोडशधा पुनः ॥ १ ॥
मध्ये तस्य चतुर्भिस्तु कुर्यादायसमन्वितम् ।
द्वादशैव तु भागानि[2] भित्त्यर्थं[3] परिकल्पयेत् ॥ २ ॥
जङ्घोच्छ्रायं तु कर्तव्यं चतुर्भागेन चायतम् ।
जङ्घयोर्द्विगुणोच्छ्रायं मञ्जर्याः कल्पयेद् बुधः ॥ ३ ॥
चतुर्भागेन मञ्जर्याः कार्या सम्यक् प्रदक्षिणा ।
तन्मानं[4] निगमं कार्यमुभयोः पार्श्वयोः समम् ॥ ४ ॥
शिखरेण समं कार्यमग्रे[5] जगति विस्तरम् ।
द्विगुणेनापि कर्तव्यं यथाशोभानुरूपतः ॥ ५ ॥
विस्तारं मण्डपस्याग्रे गर्भं सूत्रद्वयेन तु ।
दैर्घ्यात् पादाधिकं कुर्यात्[6] मध्ये स्तम्भैर्विभूषितम् ॥ ६ ॥

[1] भवेत्—A. [2] भागादि—B,C. [3] भित्त्यर्थं—A. [4] तन्माना—B,C. ; तन्मान—D.
[5] कार्यमान—B,C. [6] कार्य —B,C. ; दैर्घ्यात् पादादिके कुर्यात्—E.

प्रासादगर्भमानं वा कुर्वीत मुखमण्डपम्।
एकाशीतिपदैर्वास्तुं यष्ट्वा मण्डपमारभेत्॥ ६॥
शुकाढ्य[7]द्वारविन्यासे पादान्त[क] स्थान् यजेत् सुरान्।
तथा प्राकारविन्यासे यजेद्द्वात्रिंशदन्तगान्॥ ८॥
सर्वसाधारणं चैतत् प्रासादस्य तु लक्षणम्।
मानेन प्रतिमाया वा प्रासादमपरं शृणु॥ ९॥
प्रतिमायाः प्रमाणेन कर्तव्या पिण्डिका शुभा।
गर्भस्तु पिण्डिकार्धेन गर्भमानास्तु भित्तयः॥ १०॥
भित्तेरायाममानेन उच्छ्रायं तु प्रकल्पयेत्।
भित्त्युच्छ्राय[ख]ं तु द्विगुणं शिखरं कल्पयेद् गुरुः[8]॥ ११॥
शिखरस्य तु तुर्येण भ्रमणं परिकल्पयेत्।
शिखरस्य चतुर्थेन अग्रतो मुखमण्डपम्॥ १२॥
अष्टमांशेन गर्भस्य रथकानां तु निर्गमः।
परिधेर्गुणभागेन रथकांस्तत्र कल्पयेत्॥ १३॥
तत्तृतीयेन वा कुर्यात् रथकानां तु निर्गमम्[9]।
रामत्रयं स्थापनीयं रथकत्रितये सदा॥ १४॥
शिखरार्थं हि सूत्राणि रत्नानि विनिपातयेत्।
शुकनासोर्ध्वतः सूत्रं तिर्यक्सूत्रं निपातयेत्[10]॥ १५॥
शिखरस्यार्धभागस्थं सिंहं तत्र च कारयेत्।
शुकनासां स्थिरीकृत्य मध्यसन्धौ विधारयेत्[11]॥ १६॥
अपरे च तथा पार्श्वे तद्वत् सूत्रं निधापयेत्।
तदूर्ध्वं तु भवेदीशं कण्ठे श्यामलसारवान्[12]॥ १७॥
स्कन्धभग्नं[13] न कर्तव्यं विकरालं तथैव च।
ऊर्ध्वं तु वेदिकामानात् कलसं परिकल्पयेत्॥ १८॥

[7] शुकाढ्या—B,C. [क] पदान्त—D. [ख] भित्त्युच्छ्रयं—D. [8] बुधः—B,C. [9] निर्गमः—A,D. [10] A and E omit this line. [11] विदाचयेत्—B,C. [12] कश्चो मनसा वरान्—B,C; कण्ठोऽस्य मनसा वरान्—A,D,F. [13] भग्नस्कन्धन्तु—A; स्कन्धभग्नं तु—E,F.

विस्तारं द्विगुणद्वारं[14] कर्तव्यं तु सुशोभनम् ।
जातरूपं .... स्वरैः[15] ॥ १६ ॥
औम्बरा[16]ऽर्धतः स्वर्णं दत्त्वा शाखां न्यसेद् बुधः ।
तूर्यमङ्गलघोषेण ब्राह्मणान् स्वस्तिवाच्य च ॥ २० ॥
द्वारस्य तु चतुर्थांशे कार्यौ चण्डप्रचण्डकौ ।
दण्डहस्तौ तु कर्तव्यौ विष्वक्सेनोपमावुभौ ॥ २१ ॥
शाखार्धं न्यस्य रत्नानि न्यसेदूर्ध्वमुदुम्बरम्[17] ।
तस्य मध्ये स्थिता देवी साक्षाल्लक्ष्मी सुरेश्वरी ॥ २२ ॥
कर्तव्या दिग्गजैः सा तु स्नाप्यमाना[18] घटेन तु ।
शाखोदुम्बरकौ कार्यौ पत्रवल्ल्यादिभूषितौ[19] ॥ २३ ॥
एकशाखं त्रिशाखं वा षट्शाखं द्वारमिष्यते ।
नवशाखं च कुर्वीत अत ऊर्ध्वं न कारयेत् ॥ २४ ॥
विष्ण्ववताररूपाद्यैः शाखां यत्नाद् विभूषयेत् ।
प्रासादस्य चतुर्भागैः प्राकारस्योच्छ्रयो भवेत् ॥ २५ ॥
प्राकारात् पादहीनं तु गोपुरस्योच्छ्रयो भवेत्[20] ।
पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका ॥ २६ ॥
तस्मात् तु द्विगुणः प्रोक्तस्तथा गरुडमण्डपः ।
एकहस्तादि कुर्वीत त्रिंशद्धस्तान्तमेव च ॥ २७ ॥
एकभूम्यादिकं कुर्यात् सप्तभूम्यन्तमेव च[21] ।
वायव्यां नागनाम्ना तु विष्णवे चैकभूमिकम् ॥ २८ ॥
द्विभौमिकं तथाग्नेयं माहेन्द्रं तु त्रिभौमिकम् ।
चतुर्भागं तु वारुण्यां सौरं स्यात् पञ्चभौमिकम् ॥ २९ ॥
सौम्यं षाड्भौमिकं[22] ज्ञेयं वैष्णवं सप्तभौमिकम् ।
गरुत्वन्तं[23] तथा कुर्यादुपरिष्टाच्चतुर्दिशम्[24] ॥ ३० ॥

[14] द्विगुणं द्वारं—B,C. [15] There are some lacunae in the mss. here. A B, C,D,F show—जातरूपं ..स्वरैः। E omits the line. [16] ऊडुम्बरो—A. [17] ऊडुम्बरम् —B,C. [18] स्थाप्यमाना –B,C. [19] पिप्पवल्यादिभूषितौ—A. [20] A omits this line. [21] A omits this line. [22] षड्भौमिकं—B,C. [23] गुरुरन्तं—A. [24] चतुर्गुणं—A,D.

कुर्याद्धि प्रतिमायामान् दिक्षु चाष्टासु चोपरि।
महावराहमैन्द्र्यां तु नरसिंहं तु दक्षिणे ॥ ३१ ॥
प्रतीच्यां श्रीधरं देवमुदीच्यां हयशीर्षकम्।
आग्नेय्यां जामदग्न्यं तु[ग] नैर्ऋते राममेव च ॥ ३२ ॥
वामनं चैव वायव्यां वासुदेवमथापरे।
पूर्वभूमौ तु शयनं द्वितीये चाशनं[25] भवेत् ॥ ३३ ॥
स्थानमेव तृतीये तु चतुर्थे यानमेव च।
पञ्चमे योग[26]निद्रा तु षष्ठे योगासनं भवेत् ॥ ३४ ॥
स्थान[27]योगसमायुक्तं सप्तमे परिकल्पयेत्।
नानागवाक्षकैर्युक्तात् पत्रवल्ल्यादिभूषितम् ॥ ३५ ॥
नानाप्रकारपुष्पाद्यैर्यथाशोभं प्रकल्पयेत्।
कनिष्ठमध्यज्येष्ठानां प्रासादानां यथाक्रमम् ॥ ३६ ॥
वसुभार्गवविद्वद्भिः[28] प्रदेया रचना बुधैः[क]।
द्वारस्य चाष्टमे युक्ते नवमे दशमे तथा ॥ ३७ ॥
ललाटवेधो नैव[29] स्यादार्य तु शृणु साम्प्रतम्।
यावद्धस्तैरभिप्रेतः प्रासादः कर्तृणानघ ॥ ३८ ॥
तावद्भिरङ्गुलैरायो वसुभागेन वा भवेत्।
एकस्तम्भो ध्वजो ज्ञेयो द्विस्तम्भा वेदिका मता ॥ ३९ ॥
दश[30]भूम्यन्तरे नित्यं चतुःस्तम्भं प्रकल्पयेत्।
तोरणस्य विधानं च कथितं तु तवानघ ॥ ४० ॥
प्रसादाग्रे यदा कार्या वेदिका स्तम्भसंयुता।
वैष्णवैस्तु तदा कार्या वेदिका स्तम्भसंयुता ॥ ४१ ॥
॥ १३ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे त्रयोदशः प्रासादलक्षणपटलः ॥ १३ ॥

[ग] च—D. [25] चासनं—B,C. [26] याग—A. [27] स्थान—B,C. [28] The text here is mulilated in the mss. वसुभार्गवकृत्विग्भिः—D,E. [क] शुभा—F. [29] नैवं—A,D. [30] कुश—B,C.

चतुर्दशः पटलः

श्रीभगवान् उवाच—

अतः परं प्रवक्ष्यामि प्रासादानांक तु लक्षणम्।
यथा येषु सुराः स्थाप्यास्तच्छृणुष्व ममानघ ॥ १ ॥
पञ्चायतनमध्ये तु वासुदेवं निवेशयेत्।
आग्नेये नैर्ऋते चैव वायव्यां त्वीशगोचरे ॥ २ ॥
वामनं नरसिंहं च हयशीर्षं नृशूकरम्।
स्थापयीत[1] यथान्यायमपरं शृणु मेऽनघ ॥ ३ ॥
मध्ये नारायणं[2] स्थाप्य[3] आग्नेय्यामम्बिकां न्यसेत्।
नैर्ऋत्यां भास्करं स्थाप्य वायव्यां कमलोद्भवम् ॥ ४ ॥
ऐशान्यां स्थापयेल्लिङ्गमथवा रुद्ररूपकम्।
नवायतनमध्ये तु वासुदेवं निवासयेत् ॥ ५ ॥
पूर्वादीशानपर्यन्तं रामादीन् विन्यसेत् पुनः।
इन्द्रादीन् वा लोकपालानष्टदिक्षु यथाक्रमम् ॥ ६ ॥
अथवान्यप्रकारेण नवायतनमुच्यते।
पञ्चायतनसंस्थाने वडभ्यो यत्र मध्यमाः[4] ॥ ७ ॥
पुरुषोत्तममूर्तिस्तु मध्ये स्थाप्या विचक्षणैः।
पूर्वगायां वडभ्यां च लक्ष्मीवैश्रवणौ न्यसेत् ॥ ८ ॥
दक्षिणस्यां वडभ्यां तु न्यसेन्मातृगणं बुधः।
ईशानं च[5] तथा स्कन्दं गणेशं चात्र विन्यसेत् ॥ ९ ॥
पश्चिमायां वडभ्यां तु सूर्यादीन् विन्यसेद् ग्रहान्।
उत्तरस्यां वडभ्यां तु मत्स्यादीन् विन्यसेद् दश ॥ १० ॥
आग्नेय्यां चण्डिका स्थाप्या नैर्ऋत्यामम्बिकां न्यसेत्।
सरस्वतीं तु वायव्यां पद्मामीशानगोचरे ॥ ११ ॥

क प्रासादस्य—D,F. [1] स्थापनीयं—B,C. [2] नारायणः—B,C. [3] स्थाप्यं—B,C
[4] मध्योगा—B. [5] ईशानश्चेन—A.

मध्ये च[6] स्थापयेद् देवीं (वं ?) वासुदेवं यथोदितम् ।
नारायणं श्रीधरं वा[7] वामनं मोहनाशनम् ॥ १२ ॥
द्वादशायतनं तत् तु[8] मध्यमं तु त्रयोदश ।
अस्मिन् देवविभागानि[9] शृणुष्व सुरसत्तम ॥ १३ ॥
विश्वरूपं न्यसेन्मध्ये केशवादीन् प्रदक्षिणम् ।
पूर्वाद्यनुक्रमेणैव यथावद् विनिवेशयेत् ॥ १४ ॥
यां मूर्तिं स्थापयेन्मध्ये तत्स्थाने मध्यमां न्यसेत् ।
कामनाभेदतश्चायं वेधः साधारणः स्मृतः ॥ १५ ॥
प्रासादलक्षणं प्रोक्तं संक्षेपेण मया तव ।
तथैवान्येऽपि कर्तव्या येऽस्मिन् संकीर्तिता[ख] मया ॥ १६ ॥
॥ १४ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
चतुर्दशः प्रासाद-[10]देवतासंस्थापनपटलः ॥ १४ ॥

पञ्चदशः पटलः

श्रीभगवान्* उपाच—

शिलाया लक्षणं वक्ष्ये तदिहैकमनाः शृणु ।
मृन्मयी दारुघटिता लौहजा[1]रत्नजा तथा ॥ १ ॥
शैलजा गन्धजा चैव कौसुमा[2] सप्तमी तथा[3] ।
कौसुमा रत्नजा[4] चैव मृन्मयी प्रतिमा हिता ॥ २ ॥
तत्कालपूजिताश्चैताः[5] सर्वकामफलप्रदाः ।
अथ शैलमयीं वक्ष्ये शिला यत्र प्रपूज्यते[6] ॥ ३ ॥

[6] तु—B,C. [7] च—B,C. [8] यत्र—B,C. [9] वितानानि—B,C. [ख] ये तस्मिन् कीर्तिता—D. [10] 'प्रासाद'—is omitted in A,B,C. * Some mss. drop श्री all through. [1] लौहजा—B,C. [2] कीमुदी—A; कौसुमी -D,F. [3] स्मृता—A,D,F. [4] कौसुमा गन्धजा—B,C.; कौसुमी—D. [5] शैव—B,C. [6] च पूज्यते—A,F.

त्रिकूटे मन्दरे चैव शङ्करस्य पुरे गिरौ।[7]
माल्यवत्पर्वते चैव मलये गन्धमादने ॥ ४ ॥
दशैतेषु शिला ग्राह्या अलाभे चापरान् शृणु।[8]
श्रीगिरौ कैकटे[क] चैव किष्किन्धे[9] रैवते तथा ॥ ५ ॥
मन्दरे चैव माहेन्द्रे कैलासे विन्ध्यपर्वते।
चित्रकूटे तथा श्वेते दर्दुरे सह्यपर्वते[10] ॥ ६ ॥
एतेष्वपि शिला ग्राह्याः पुण्येष्वन्येष्वपि द्विजाः[11]।
पर्वतानामभावे तु गृह्णीयाद् भूगतां शिलाम् ॥ ७ ॥
आग्नेयी वायवी चैव माहेन्द्री वारुणी तथा।
चतस्रो भूमयः प्रोक्तास्तासां वक्ष्यामि लक्षणम् ॥ ८ ॥
ब्रह्मवृक्षैः सकाश्मर्यैः[12] खदिरैर्वेणुभिश्चिताः।[13]
तोयच्चास्वल्पकं यस्यां पतङ्गैरलिभिर्युताः ॥ ९ ॥
मयूरैस्तित्तिरैर्गृध्रैः सारसै[14]र्या समाकुला।
आग्नेयी सा क्षितिः प्रोक्ता कठिना तत्र या[15] शिला ॥ १० ॥
तृणतोयविहीना या ग्रीष्मे स[16]मृगतृष्णिका।
उषरा यत्र दृश्यन्ते शृगाला[17] बहवस्तथा ॥ ११ ॥
विभीतकार्कसंकीर्णा कर्करा[18] त्वहिसंवृता।
पीलुश्लेश्मातकाकीर्णा वायवी सा प्रकीर्तिता ॥ १२ ॥
तद्भूमिसम्भवा वर्ज्या शिला यत्नेन देशिकैः।
व्रीहिक्षेत्रं स्थितं यस्यां दक्षिणे सुमनोहरम् ॥ १३ ॥
क्षीरिणः फलिनो वृक्षाः सपुष्पा[19]यत्र पश्चिमे।
जलाशयं सनलिनं यस्यामुत्तरतः स्थितम् ॥ १४ ॥

[a] सुरे—C.; शङ्कर श्वशुरे—F. [7] त्रिकूटे मन्दरे चव निषधे नीलपर्वते—B,D, (additional line) F. [8] दशैते सुशिला ग्राह्याः पुण्येष्वन्येष्वपि द्विजाः—B. [क] श्रीकटे—A,B,C,D. [9] किस्कन्धे—C. [10] सम्भपवते—A,B. [11] सम्पन्नान्येष्वपि—B. [12] ब्रह्मब्रह्मस्कास्वर्यैः—C. [13] —श्वेताः—C. [14] सरलैर्या—C. [15] यत्र सा—B, [16] सा—C. [17] मृणाला—B. [18] सार्कवा—A. [19] सपत्रा—B,C.

माहेन्द्री सा क्षितिः शस्ता शिला तत्रोद्भवा च या।
जलाशयैः पद्मषण्डैर्मण्डिता या समन्ततः॥ १५॥
कीर्णा पुष्पवनैर्या च वारुणी सा क्षितिः शुभा।
तत्रोद्गता शिला या च[20] सा शस्ता सुरसत्तम[21]॥ १६॥
आग्नेयी गुर्जराद्येषु वायवी मरुषु स्मृता।
माहेन्द्री मध्यदेशेषु[22] अनूपेषु च वारुणी॥ १७॥
क्षाराम्लसेविता[23] या च नदीतीरसमुद्भवा।
पुरमध्ये[24] स्थिता या च तथा पितृवने स्थिता॥ १८॥
चतुष्पथे स्थिता या च मृच्छिला पङ्किला[25] च या।
उषरे[26] च तथा मध्ये वाल्मीके[27] चापि[28] या स्थिता॥ १९॥
सूर्यरश्मिप्रतप्ता या या च दग्धा वनाग्निना[29]।
अन्यकल्पो[30]पयुक्ता या चान्यदेवार्थ[31] निर्मिता॥ २०॥
क्रव्यादाद्यैरुपहता वर्ज्या यत्नेन वै शिला।
विवर्णा च कुवर्णा च रुक्षवर्णा च वर्जिता॥ २१॥[32]
सभाचत्वरसंस्था च ह्यत्यन्तोपहता शिला।
येन केनचिदानीता वर्जनीया तथा शिला॥ २२॥
पुण्यसिन्धूद्भवा ग्राह्या पुण्यतीर्थोद्भवा च या।
नदीपर्वतसंलग्ना वृक्षच्छायासमावृता[33]॥ २३॥
निमग्ना भूतले या[34] वा संस्पृष्टा[35] सूर्यरश्मिभिः।
अन्तर्जलोषिता[(a)] नद्यामेमकवर्णा मनोरमा[36]॥ २४॥
पाण्डुरा चारुणा पीता कृष्णा शस्ता तु वर्णिनाम्।
न यदा लभ्यते[37] सम्यग्[38] वर्णिनां वर्णतः शिला॥ २५॥

[20] तु—B,C. [21] सुरसत्तमः—B,C. [22] मध्यदेशे तु—B,C. [23] क्षीराम्बु—B; क्षाराम्बु—C. [24] पूर्वमध्ये—B. [25] श्लेष्मच्छालाक्षणैः—B; मृच्छिलापङ्कने—C,D. [26] उरसे—A; उषार—B,C. [27] मल्मीके—A. [28] यापि—C. [29] दवाग्निना—B,C,D. [30] अन्यकर्मो—A. [31] अन्यदेवासु—A. [32] These two lines are omitted in A, C and D. [33] मनावृता—B,C. [34] वा—B,C. [35] या स्पृष्टा—B,C. [(a)] मलाश्रिता—B,C. [36] मनोहरा—B,C. [37] नद्यते—B,C. [38] सम्पत्—A.

वर्णाद्या[39]पादनं तत्र जुहुयात् सिंहविद्यया ।
कृते वर्णस्य जनने[40] तस्य वर्णस्य सा शुभा ॥ २६ ॥
श्रेष्ठवर्णा सुवर्णा च रेखा[41] सर्वस्य शस्यते ।
अपरस्य तु वर्णस्य श्रेष्ठा सा[42] न प्रशस्यते ॥ २७ ॥
वर्णिनामिह सर्वेषां कृष्णरेखा प्रशस्यते ।
शिलानामिह सर्वासां शुक्लरेखा प्रशस्यते ॥ २८ ॥
रेखाणामपि सर्वासां व्यत्यासे[43] होममाचरेत् ।
पातालनरसिंहेन सहस्रं देशिकोत्तमः[44] ॥ २९ ॥
तर्पिते मन्त्रराजे तु ततः सा शुभदा नृणाम् ।
विपरीते तु विमले विम्बके[45] हीरके तथा ॥ ३० ॥
इममेव विधिं कुर्यादन्यस्मिन्नपि गर्हिते ।
युवा[46] मध्या भवेद् ग्राह्या बाला वृद्धा च गर्हिता ॥ ३१ ॥
सुगन्धा निविडा स्निग्धा तथा गम्भीरनिस्वना ।
शीतला या[47] च तेजाढ्या युवेति[48] प्रोच्यते शिला ॥ ३२ ॥
तद्रूपा प्रोच्यते मध्या[49] किन्तु सा कठिना भवेत् ।
अतिमृद्वी भवेद् बाला वृद्धातिकठिना मता ॥ ३३ ॥
टङ्काघातसहा[50] बाला वृद्धा लोकक्षयी स्मृता[51] ।
स्त्रीपुंनपुंसकं चैव लक्षणैनैव लक्षयेत् ॥ ३४ ॥
उत्पाट्यमाने दृश्यन्ते तिन्दुकालातवज् ज्वलन् ।
स्फुलिङ्गाः श्रूयते नादः कांस्यघन्टानिनादवत् ॥ ३५ ॥
मूले मध्ये तथाग्रे च पुंलिङ्गेति च सा स्मृता ।
तदेव लक्षणं यत्र मन्दमन्दं[52] प्रतीयते ॥ ३६ ॥
स्त्रीलिङ्गेति मता सा च भिन्नकांस्यध्वनिस्तु या ।
नपुंसकेति सा ज्ञेया न यत्रैतत्त्रयं भवेत् ॥ ३७ ॥

[39] वर्णाद्यो—B,C. [40] कृष्णवर्णादिज्वलने—B. [41] रेखां—B. [42] श्रेष्ठसा—A,D. [43] वेद्यादि—B,C. [44] देशिकोत्तम—A. [45] विन्धके—B,C., विन्द्रके—D. [46] सुरा—B,C. [47] शीलया—B. [48] स्वरेति—B,C. [49] मध्यमा क्षात्राकीर्णा—C. [50] सहा omitted in B,C. [51] लोकक्षयङ्क री—B,C. ; लोकक्षयंकरी—D. [52] मन्दं मन्दं—A,C.

पुंलिङ्गैः प्रतिमा कार्या स्त्रीलिङ्गैः पादपीठिका[53] ।
पिण्डिकार्थं तु[54] सा ग्राह्या दृष्टा या षण्डलक्षणा[55] ॥ ३८ ॥
लिङ्गानां तु विपर्यासे पूर्वोक्तं होममाचरेत् ।
छेदने भेदने वाथ शिलागर्भं समीक्ष्यते[56] ॥ ३९ ॥
दृश्यन्ते मण्डला यस्यां सगर्भा[57] तां विनिर्दिशेत् ।
मण्डूको मण्डले तु स्याल्लोहिते नात्र संशयः ॥ ४० ॥
हरिद्राभे[58] भवेद् गोधा कृष्णसर्पस्तथासिते ।
निस्त्रिंश[59]सदृशे तोयं गृहगोधा तु कर्कशे ॥ ४१ ॥
आखुः पिङ्गलवर्णे स्यादरुणे शरटस्तथा ।
पिङ्गवर्णे[60] तु पाषाणः पद्माभे सिकता भवेत् ॥ ४२ ॥
वृश्चिकः स्याद् विचित्रे तु पीते नीले पतङ्गकः ।
पारावताभे खद्योत:[क] मण्डले तु विनिर्दिशेत् ॥ ४३ ॥
अकल्पना तु मण्डूके दौर्भाग्यं गोधया भवेत् ।
सर्पे[61] विषेण मरणमनावृष्टिस्तथा जले ॥ ४४ ॥
धनहानिस्तु गोधाया[62] माखूनामिष्टजो भवेत् ।
अल्पायुषस्तु शरटे पाषाणैर्विद्युता वधः ॥ ४५ ॥
वालुकायामनावृष्टिः कलहो वृश्चिके भवेत् ।
राष्ट्रोच्छित्तिस्तु शलभे खद्योते[63] गोत्रसंक्षयः ॥ ४६ ॥
... ...
तस्मात् परीक्ष्य यत्नेन शिलां[64] गृह्णीत देशिकः ॥ ४७ ॥
सगर्भया तु शिलया रूपकं क्रियते यदि ।
तद्देशे म्रियते राजा यजमानोऽथ देशिकः ॥ ४८ ॥

[53] पिठका—B. [54] पिण्डिकार्त्तं तु—B,C. [55] दृष्टा या पशुलक्षणा—A,D; F. तृष्णाया पशुलक्षणा—B; तृष्णा या पुंलक्षणा—C; .. पशुलक्षणा—Varendra ed. [56] समीक्ष्येत—A. [57] सगर्भतां—B,C. [58] हरिद्राभा—A. [59] निःस्त्रिंश—A,B. [60] पिङ्गल—C. [क] खद्योतम्—D. [61] सर्प—B. [62] धनहानिगोधिया भवेत्—C. [63] खद्योतो—C. [64] शिला—C.

शिलायामपि वृक्षेषु यत्नाद् गर्भं समीक्षयेत्[65]।
सोभाग्यदा शैलजा स्यात्[66] स्वर्णजा[ख] पुष्टिदा भवेत्॥ ४९॥
सुखप्रदा[67] स्यान्मणिजा राजती कीर्तिदा भवेत्।
ताम्रजा धनदा प्रोक्ता श्रीप्रदा वृक्षजा[68] मता॥ ५०॥
कौसुमा सुखदा प्रोक्ता गन्धजा[69] भोगदा[70] मता।
प्रत्यग्रस्थापिता वापि[71] मृन्मयी सर्वसिद्धिदा[72]॥ ५१॥
वृक्षादीनां तु भेदेन कामभेदेन वा नृणाम्।
भिद्यते बहुधा धीरै[73]र्ज्ञात्वा[74] कार्या तु देशिकैः[75]॥ ५२॥
॥ १५॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे पञ्चदशः शिलालक्षणपटलः॥ १५॥

षोडशः पटलः

श्रीभगवान् उवाच—

सुवारे सुतिथौ योगे स्वर्क्षे सुकरणान्विते[1]।
अपूर्यमाणपक्षे तु सुग्रहे चोत्तरायणे॥ १॥
यजमानानुकूले तु प्रतिमार्थं व्रजेद् गुरुः।
श्वेतवस्त्रपरिधानः श्वेतचन्दनचर्चितः॥ २॥
श्वेतपुष्पकृतापीडः शिल्पिभिः सहितो गुरुः।
निपुणैः शिल्पिभिः सार्धं सहायैर्बलवत्तरैः॥ ३॥
नृसिंहं पूज्य विज्ञाप्य पूज्य टङ्कादिकं ततः।
ध्यात्वा[2] हरिं हविः प्राश्य मन्त्राङ्गन्यस्तविग्रहः॥ ४॥

[65] समीक्षते—C. [66] भाग्यदा शैलजा स्याच्च—A,B. [ख] स्वर्णभा—D. [67] सुखप्रजा—C. [68] ब्रह्मजा—B,C. [69] ब्रह्मजा—B,C. [70] भोगजा—B,C. [71] चापि—C. [72] सर्वकामदा—C. [73] वीरैः—C. [74] कृत्वा—B. [75] तद्विदैः—A,B,D,F. [1] नक्षत्रे करणान्विते—A. [2] ध्यायन्—B,C.

ब्राह्मणान् वाचयित्वा तु भक्त्या[3] मङ्गलदर्शनम् ।
दधिं दूर्वां रोचनां वा आदर्शं कुसुमं सितम् ॥ ५ ॥
फलं च[4] पूर्णकुम्भं च वन्दयित्वा[5] वनं व्रजेत् ।
दिव्यान्तरिक्षभौमानि निमित्तान्युपलक्षयन् ॥ ६ ॥
यायाच्छुभ[6]-निमित्तेषु विपरीते निवर्तयेत्[7] ।
त्रिरायम्य[8] ततः प्राणान् ध्यायेत् सिंहतनुं हरिम् ॥ ७ ॥
पुनश्चाष्टोत्तरं जप्त्वा पातालमुषलं जपेत्[9] ।
गीतवाद्यवरौ दृष्ट्वा[10] यात्रा स्यात् सिद्धिदा नृणाम् ॥ ८ ॥
लक्ष्मीं ध्यायन् वनं यायात् सहायैः शिल्पिभिः सह ।
शङ्खकाहलशब्दैश्च पुण्याहजयमिश्रितैः ॥ ९ ॥
ऋग्यजुःसामसंघैश्च[11] ध्यायन् सिंहं वनं व्रजेत् ।
प्राचीं दिशमथोदीचीमैशानीं वा व्रजेद् गुरुः ॥ १० ॥
भूधराद्यास्तु ये पूर्वं सस्थानाः[12] कथिता मया ।
तत्र गत्वा समीपे तु कृतरक्षो वनं विशेत् ॥ ११ ॥
प्रविश्य तत्र यत्नेन शिल्पिभिः सहितो गुरुः ।
निरूपयेत् समन्तात् तु वृक्षं वाप्यथवा शिलाम् ॥ १२ ॥
लक्षणेन तु[13] मन्त्रज्ञो यत् पूर्वं कथितं मया ।
एकवर्णां शिलां दृष्ट्वा बाह्यदोषविवर्जिताम् ॥ १३ ॥
चतुर्दिक्षु समं कृत्वा भूमिभागं विशोधयेत् ।
प्लाव्य तोयेन पूतेन[14] गोमयेन विलेपयेत् ॥ १४ ॥
तत्रैव मण्डपं कृत्वा वासुदेवं ततो जपेत् ।
पताकैस्तोरणैश्चित्रैर्मण्डपं तं[15] विभूषयेत् ॥ १५ ॥

[3] कुर्यात्—B,C. [4] तु—A,D. [5] बन्धयित्वा—B. [6] मया शुभ—B. [7] विपरीतेन वर्तयेत्—B. [8] त्रिधायम्य—C. [9] यजेत्—B,C. [10] वरोत्कृष्णा—B.C. [11] शब्दैश्च—B,C. [12] संस्थिताः—B,C.; संस्थानाः—D. [13] तु omitted in C. [14] पूतेन तोयेन—B,C. [15] मण्डपान्तं—B.D,

पूजयेदथ दिग्देवान्[16] भूतक्रबलिं हरेत् ।
मांसं हरिद्राचूर्णं च दधिशक्तु[17]समन्वितम् ॥ १६ ॥
अत्र ये वा स्थिराः सर्वा (?) यातुधानाश्च गुह्यकाः ।
सिद्धादयो वा ये चान्ये तान् संपूज्य समापयेत्[18] ॥ १७ ॥
सलाजं माषभक्तं च दद्यात् क्रूरबलिं बुधः ।
विष्णुं पूज्य विधानेन क्रमशस्तान् प्रपूजयेत् ॥ १८ ॥
वायव्यामस्त्रमन्त्रेण गन्धपुष्पैः प्रपूजयेत् ।
वह्निं प्रज्वाल्य विधिना मन्त्रान् सन्तर्पयेत् ततः[19] ॥ १९ ॥
हुत्वा यथोक्तविधिना शान्तितोयं[20] समारभेत् ।
शान्तितोयं ततो गृह्य मन्त्रेण[21] प्रोक्षयेच्छिलांम् ॥ २० ॥
दर्भैरुल्लेखयेत् पश्चादश्म[22]-मन्त्रेण तां शिलाम् ।
मन्त्रैरालभ्य तां यत्नाच्छुक्लवस्त्रेण वेष्टयेत् ॥ २१ ॥
रक्तां कृत्वा नृसिंहेन दर्भैराच्छाद्य पूजयेत् ।
गन्धैः पुष्पैश्च नैवेद्यैर्धूपैश्च[23] पूज्य तां शिलाम् ॥ २२ ॥
ततस्तु मूलमन्त्रेण आज्यमष्टशतं हुनेत् (?) ।
ततः पूर्णाहुतिं दद्यान्मन्त्रराजेन[24] वै गुरुः ॥ २३ ॥
एवं समर्प्य[25] संपूज्य विज्ञाप्य च बलिं हरेत् ।
गन्धैः पुष्पैस्तथा धूपैर्दद्याद भूतबलिं बुधः ॥ २४ ॥
अत्र येऽवस्थिताः सत्त्वा[26] यातुधानाश्च गुह्यकाः ।
सिद्धादयो वा ये चान्ये तान् संपूज्य क्षमापयेत् ॥ २५ ॥
"विष्णुविम्बार्थमस्माकं[27] यत्रैषा केशवाज्ञया[28] ।
विष्णवर्थं यद् भवेत्[29] कार्यमस्माक[30]मपि तद् भवेत् ॥ २६ ॥

[16] दिग्बारान्—B,C. [17] हरिद्राचूर्णं तु दधिगन्ध—B,C. [18] This verse is omitted in A.C and D,F. [19] सन्तर्प्य पूजयेत्—A,D. [20] होमं—B,C. [21] मन्त्रैः—A. [22] गन्धमन्त्रेण—B,C ; अस्त्रमन्त्रेण—A. [23] गन्धपुष्पैश्च नैवेद्यैः—B,C. [24] मूलमन्त्रेण—B,C. [25] सन्तर्प्य—B,C. [26] सर्वा—B,C. [27] ... विम्बाग्रमस्कारं—B,C. [28] केशवादयः—B. [29] अभवत्—B,C. [30] युष्माकमपि—A,B.

अनेन बलिदानेन प्रीता भवथ[31] सर्वदा ।
क्षेमेण गच्छतान्यत्र मुक्त्वा स्थानमिदं भव" [32] ॥ २७ ॥
एवं प्रबोधिताः सत्त्वाः परितुष्टा यथासुखम्[33] ।
आचम्य संविश्य ततः (?) कृतरक्षापुरःसरः ॥ २८ ॥
चरुं प्राश्य निराहारः शिल्पिभिः सह देशिकः ।
हरिं विज्ञाप्य विधिवद् देवीं च कमलोद्भवाम् ॥ २९ ॥
पश्चिमे दर्भशय्यायां वसेत् तां रजनीं गुरुः ।
निराहारः स्थितो भूत्वा प्रामाणारम्भकं जपन् ॥ ३० ॥
"ॐ नमः[34] सर्वलोकपित्रे विष्णवे प्रभविष्णवे ।
विश्वाय विश्वरूपाय स्वर्गा[35]धिपतये नमः ॥ ३१ ॥
आगच्छ देवदेवेश प्रपन्नोऽस्मि तवान्तिकम् ।
स्वप्ने सर्वाणि कार्याणि हृदिस्थानानि यानि मे ॥ ३२ ॥
ॐ ह्रूँ फट् विष्णवे स्वाहा ॥"
यदा संपश्यति[36] वृक्षं ज्वलन्तं धूम[37]-वर्जितम् ।
फलितं पुष्पितं चैव तदा सिद्धिर्न[38] दूरतः ॥ ३३ ॥
प्रज्वलन्तीं शिलां पश्येत् श्रिया वाधिष्ठितां शुभाम्[39] ।
ब्रह्मणा[क] धिष्ठितां वापि सा तदा सर्वकामदा ॥ ३४ ॥
श्रिया जुष्टं प्रज्वलन्तमथ पश्यति पर्वतम् ।
ततः प्रवृद्धशिखरं काञ्चनद्रुममण्डितम्[40] ॥ ३५ ॥
युतं शैलोद्भवैर्वृक्षैः फलपुष्पसमन्वितैः ।
एवंभूते तु संदृष्टे[41] स्वप्ने अर्चा[42] सुशोभना[43] ॥ ३६ ॥
अपरेऽहनि संप्राप्ते कृतरक्षः कृताह्निकः ।
शस्त्राणि विधिवत् पूज्य शिलां पूज्य[44] विधानतः ॥ ३७ ॥

[31] भवति –B,C. [32] हर—A ; हरम्—B,C. [33] यथा सुखम्—B,C. [34] नमः omitted in B,C. [35] स्वप्राधिपतये—B,C. [36] सदा स पश्यते—A,D ; यदा संपश्यते—B. [37] भूमि-वर्जितम्—B. [38] द्धि is omitted in B. [39] ...पश्य प्रज्वलन्ती शिला पश्येस्य—B ; स्त्रियां वाधिष्ठितां शिलाम्—A. [क] ब्राह्मणा—D. [40] काञ्चनद्रुमपर्वमण्डितम्—B. [41] सं omitted in B,C. [42] चर्चा—B. [43] सुशोभनाः A ; सुशोभन —B. [44] शिलां पूज्य—omitted in B.

अर्घ्यं दत्त्वा शिलायां तु शस्त्रं[ख] मन्त्रेण पूजयेत् ।
मन्त्रयित्वा स्वमन्त्रेण प्रज्वलन्तं विभावयेत् ॥ ३८ ॥
मध्वाद्यात्तमुखं कृत्वा[45] आत्मानं चिन्तयेद्धरिम् ।
शिल्पिनं विश्वकर्माणं ध्यात्वोदक्[46]-प्राङ्मुखोऽपि वा ॥ ३९ ॥
शस्त्रं विश्वात्मकं[ग] ध्यात्वा प्रदद्याच्छिल्पिने गुरुः ।
मुखं पृष्ठं शिरोमूलं[47] शिल्पिने दर्शयेद् गुरुः ॥ ४० ॥
शुक्लगन्धानुलिप्ताङ्गः स्नातः पुष्पाद्यलंकृतः ।
उदङ्मुखः प्राङ्मुखो वा स्थपतिः संयतः शुचिः ॥ ४१ ॥
ध्यात्वा[48] स्वदेवतां[49] शिल्पी टङ्कहस्तो[50] जितेन्द्रियः ।
यथेष्टं शातयेत्[51] पश्चाद् यच्छिरां[घ] तच्छ्रुणुष्व मे ॥ ४२ ॥
उदक्शिरां प्राक्शिरां वा तथैवेशानदिग्गताम् ।
ऊर्ध्वभागं भवेत् पृष्ठमधोभागं भवेन्मुखम् ॥ ४३ ॥
किञ्चिन्मानाधिकं कृत्वा कल्पयेत् प्रतिमाशिलाम्[52] ।
किञ्चिन्मानाधिका ग्राह्या[53] विविधाकारपिण्डिका ॥ ४४ ॥
छेदयित्वा समुद्धृत्य चतुरस्रं तु[54] कारयेत् ।
अनेनैव विधानेन परीक्ष्य गुणदोषतः[55] ॥ ४५ ॥
वृत्तं यत्नेन गृह्णीयाद् विधिज्ञो देशिकोत्तमः ।
समानीय रथं[56] श्रेष्ठं सुशीलैर्वृषभै[57]र्युतम् ॥ ४६ ॥
रथे स्थाप्य शिलां यत्नाच्छादयित्वा तु वाससा ।
हरिं ध्यात्वा स्मरन् मन्त्रमर्घ्यं दद्यात्ततो गुरुः ॥ ४७ ॥
आनीयमाने तु रथे रथाङ्गपरिवारके[58] ।
वृषभे वा समुत्पन्नेऽनिमित्तेन [तु ?] साधकः[59] ॥ ४८ ॥

ख शस्त्र –D. [45] मध्वाद्यायुक्ते मखं त्वाम् –B,C. यत्प्रीत्या सुखं कृत्वा स्वात्मानं चिन्तयेद्धरिं —E. [46] ध्यात्वादङ्कं—B,C. ग विष्ण्वात्मकं –D. [47] शिरोऽङ्गुलं –A,F. [48] ध्यात्वा च वासुदेवं तां—B. [49] स्वदेवता—A. [50] टङ्गसुहस्तः—B. [51] छादयेत्—B. घ यच्छिरन्ते—E, स्वच्छिवां others. [52] ...शिवाम् —B. [53] त्याज्या –A. [54] तु omitted in B,C. [55] ...क्षः—B. [56] रथे—A,D,E. [57] वृक्षतैः—B. [58] रथाङ्गोपरिचारके –A,D. [59] साधवः—A.

वैष्णवाग्नौ नृसिंहेन[60] तिलैर्घृत[61]विमिश्रितैः ।
हुत्वा चाष्टशतं सम्यक् तद्दोषेण विमुच्यते ॥ ४९ ॥
आनीय शङ्खनिर्घोषैर्गीतमङ्गलनिःस्वनैः[62] ।
प्रासादस्योपरिभागे कृत्वा कर्मकुटीं गुरुः ॥ ५० ॥
शिलां तां स्थाप्य तस्मिंस्तु अर्चयित्वा बलिं हरेत् ।
ततः प्रवर्तयेत् कर्म विद्वान्[63] विज्ञैस्तु शिल्पिभिः ॥ ५१ ॥
॥ १६ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे षोडशो वनयागपटलः ॥ १६ ॥

सप्तदशः पटलः

श्रीभगवान् उवाच—

यथोक्तायां दिशायां तु न यदा लभ्यते शिला ।
तदा विदिक्स्थिता ग्राह्या विधिना येन तच्छृणु ॥ १ ॥
समानीय शिलां सम्यक् पूर्वोक्तै[1]र्लक्षणैर्युताम् ।
प्रासादस्योत्तरे भागे खात्वा भूमिं विधानवित् ॥ २ ॥
शिलां संस्थाप्य तत्खाते मृदा संपूरयेद् गुरुः ।
समीकृत्य[2] तु तां भूमिं मण्डपं तत्र कारयेत् ॥ ३ ॥
पताकाध्वजपत्राद्यैर्भूषयीत समन्ततः ।
तोरणैः कदलीस्तम्भैर्वितानेन[3] तु भूषयेत् ॥ ४ ॥
प्राच्यां तु भद्रकं[4] लिख्य तत्र विष्णुं यजेद् गुरुः ।
प्रबालमुक्ताफलकै[5]र्हेमपुष्पैः समुज्ज्वलैः ॥ ५ ॥

[60] तु सिंहेन—B. [61] घृतं वर्षृतैः—B,C. [62] निःस्वर्णैः—B. [63] विद्वान् omitted in B. [1] पूर्वोक्तलक्षणैः—B. [2] समाहृत्य—B,C. [3] वितानमनु—B. [4] तत्रकं—B. [5] वर्णकैः—B,C.

पूर्वोक्तं सकलं वापि[6] विधानं समुपाचरेत् ।
भूतक्रूर[7]बलिं दद्यात् पूर्वोक्तविधिनैव तु ॥ ६ ॥
प्रतीच्यां पूर्वविधिना होमं कुर्याद् यथोदितम्[क] ।
दिग्दोषपरिशुद्धयर्थं विशेषाद्धोममाचरेत् ॥ ७ ॥
पातालनरसिंहेन सहस्रं वैष्णवानले ।
दिग्देवानामथाज्ञानां[8] हुत्वा पूजां[9] ददेद् गुरुः ॥ ८ ॥
तर्पिते मन्त्रराजे तु दिग्दोषैर्मुच्यते शिला ।
ततः पूर्वोक्तविधिना कृत्वा पूजादिकं[10] गुरुः ॥ ९ ॥
पूर्वोक्तेन विधानेन शिरःख पृष्ठादि कल्पयेत् ।
मन्त्रोदकेन संप्रोक्ष्य शिलां ताम्[11] उद्धरेद्[ग] गुरुः ॥ १० ॥
दिग्दोषप्रशमनार्थं गृष्टिं भव्यां[12] स्वलङ्कृताम् ।
सुवर्णशृङ्गसंयुक्तां कांस्यदोहां पयस्विनीम् ॥ ११ ॥
ताम्रपृष्ठां सोपवीतां दद्याद् रौप्यखुरां गुरोः ।
तोषयीत गुरुं यत्नाद् वस्त्रालङ्कारकादिभिः ॥ १२ ॥
शिल्पिनं तोषयेदेवं वस्त्रालङ्कारचन्दनैः[13] ।
आचार्ये तोषिते विष्णुस्तोषितः स्यान्न संशयः ॥ १३ ॥
शिल्पिनं तोषयेदेवं विश्वकर्मा सुपूजितः[14] ।
ततः कार्याणि कुर्वीत[15] सर्वकामप्रदा भवेत्[16] ॥ १४ ॥
॥ १७ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे सप्तदशः दिक्शान्तिपटलः ॥ १७ ॥

[6] चात्र—B,C. [7] क्रूरे—B,C, [क] यथोचितम्—F. [8] दिग्देवाय यथाज्ञानं—C ; ... यथाज्ञानं—B. [9] पूर्णां—B,C,D,F. [10] पुष्ट्यादिकं—B,F. [ख] शिलाः—F. [11] शिलास्ताः —B. [ग] प्रोक्षयेद्—F. [12] ...प्रदर्शनार्थं च शुटिं भास्या स्वलभ्रत्ता—B. [13] This line is omitted in A ; ...बन्धनैः—B,C. [14] ...विश्वकर्मानुपूजितः—B. [15] युञ्जीते—A ; कुर्वीते —B ; ...कर्माणि युञ्जीत—D. [16] कर्म प्रदापयेत्—B,C.

अष्टादशः पटलः

श्रीभगवान् उवाच

अतःपरं प्रवक्ष्यामि प्रतिमालक्षणं परम्।
यन्न कस्यचिदाख्यातं गुह्याद् गुह्यतरं परम् ॥ १ ॥
प्रासादस्योत्तरे भागे शिलां नीत्वा तु देशिकः।
कृत्वा कर्मकुटीं रम्यां प्रतिमाकर्म कारयेत् ॥ २ ॥
चतुरस्रायतां[1] कृत्वा शिलां संस्थाप्य चार्चयेत्।
शिरो मुखं च पृष्ठं च अङ्कयित्वा तु बुद्धिमान् ॥ ३ ॥
यजमानानुकूलेन गुरुः कर्म समारभेत्।
शिलां पूर्वाननां कृत्वा अथवा चो[2]त्तराननाम् ॥ ४ ॥
तोयेन ब्रह्मघोषाद्यैः स्थाप्य पश्चाद् बलिं हरेत्।
दधिदूर्वाक्षतैः पूजां नवारम्भे समाचरेत् ॥ ५ ॥
शुक्लैर्गन्धैश्च माल्यैश्च मन्त्रेणानेन देशिकः
तद् यथा—"ॐ तत् सत् नमः। योऽसौ[3] भगवान् सर्व-
जगत्प्रवीर [:] सङ्कर्षणो वासुदेवः प्रवरवराहतः[4] जय जय
सुप्रतिष्ठितः कीर्तिं प्रवर्धयस्व। ॐ ॐ[5] फट् फट्[6] नमः ॥"
स्वस्तिवाच्य द्विजान् पूज्य[क] गुरुं भक्त्या समर्चयेत्।
वस्त्रपुष्पादिदानेन अशाठ्ये[7]न तु पूजयेत् ॥ ६ ॥
मङ्गलैर्ब्रह्मघोषाद्यैः प्रतिमां संविभाजयेत्।
मध्यसूत्रं[8] समास्फाल्य[9] तीक्ष्णशस्त्रेण चोत्किरेत् ॥ ७ ॥
अभिप्रेतप्रमाणं तु नवधा प्रविभाजयेत्[10]।
नवमे[11] भास्करैर्भक्ते[12] भागं (:?) स्वाङ्गुल[13]मुच्यते ॥ ८ ॥

[1] चतुरस्रायतं—A. [2] अथवा उत्तरा—A. [3] ममावासौ—B,C. [4] ... तः—is missing in B,C. [5] ॐ ॐ ॐ—B, ओङ्कार—A. [6] फट् फट् फट् फट्—B. [क] सम्यक्—D. [7] अशोच्येन—A. [8] ... सूक्तं—B,C. [9] समास्फोन्य—B. [10] परिभाजयेत्—B,C. [11] नममे—A. [12] भास्करे भक्ते—B. [13] साङ्गल—B,C.

द्व्यङ्गुलं गोलकं नाम्ना कलानेत्रं तदुच्यते ।[14]
भागमेकं त्रिधा भक्त्वा[ख] पार्ष्णिभागं प्रकल्पयेत् ॥ ९ ॥
भागमेकं तथा जानौ ग्रीवायां भागमेव च ।
मुकुटं तालमात्रं[ग] स्याद् तालमात्रं[घ] तथा मुखम् ॥ १० ॥
तालमात्रेण कण्ठं तु तालेन हृदयं तथा ।
नाभिमेढ्रान्तरं तालं द्वितालावूरुकौ तथा ॥ ११ ॥
तालद्वयेन जङ्घा तु सूत्राणि शृणु साम्प्रतम् ।
कार्यं सूत्रद्वयं पादे जङ्घामध्ये तथा परम् ॥ १२ ॥
जानौ सूत्रद्वयं कार्य*मूरुमध्ये तथापरम् ।
मेढ्रे तथापरं कार्यं कट्यां सूत्रं तथापरम्[15] ॥ १३ ॥
मेखलाबन्धसिद्ध्यर्थं नाभ्यां चैवापरं तथा ।
हृदये च तथा कार्यं कण्ठे सूत्रद्वयं तथा[16] ॥ १४ ॥
ललाटे चापरं कार्यं मस्तके च तथापरम् ।
मुकुटोपरि कर्तव्यं सूत्रमेकं विचक्षणैः ॥ १५ ॥
सूत्रान्यूर्ध्वं प्रदेयानि सप्तैव सुरसत्तम ।
कक्षा-त्रिकान्तरेणैव कण्ठ[ङ] सूत्राणि दापयेत् ॥ १६ ॥
मध्य[17]सूत्राणि संत्यज्य[18] सूत्राण्येवं निवेशयेत्[19] ।
ललाटे नासिकावक्त्रं कर्तव्यं चतुरङ्गुलम् ॥ १७ ॥
ग्रीवाकर्णं तु कर्तव्य[20]मायामाच् चतुरङ्गुलम् ।
द्व्यङ्गुले हनुके कार्ये विस्ताराच् चिबुकं तथा ॥ १८ ॥
अष्टाङ्गुलं ललाटं[च] तु विस्तारेण प्रकीर्तितम् ।
परेण द्व्यङ्गुलौ शङ्खौ कर्तव्यावलकान्वितौ ॥ १९ ॥

[14] This line is partly omitted in B,C. [ख] भक्तां—B,C. [ग] भालमात्रं—Var. ed. [घ] भालमात्रं—Var. ed. * जानौ सूत्रद्वये कार्ये—F. [15] सूत्रद्वयं तथा—B. [16] B omits this line here but places it just after verse II.; C follows B and reads again the same line here. [ङ]—पट A,B,C. [17] मध्ये—B. [18] संयोज्य—B,C. [19] निवेदयेत्—A. [20] ग्रीवाकर्णौ तु कर्तव्यौ—B,C. [च] ललाटे—A,B,C.

चतुरङ्गुलमाख्यातमन्तरं[21] कर्णनेत्रयोः ।
द्व्यङ्गुलौ पृथुकौ कर्णौ कर्णार्धाङ्गं च पञ्चके ॥ २० ॥
भ्रुसमेन तु सूत्रेण कर्णश्रोत्रं[22] प्रकीर्तितम् ।
विद्धं षडङ्गुलं कर्णं विद्धं[23] च चतुरङ्गुलम् ॥ २१ ॥
चिबुकेन समं विद्धमविद्धं वा षडङ्गुलम् ।
खड्गपात्रं तथा वर्तिं शष्कुलीं कल्पयेत् तथा ॥ २२ ॥
अङ्गुलेनाधरः कार्यस्तस्या[24]र्धेनोत्तराधरम् ।
अर्धाङ्गुलं तथा गोजी (?) वक्त्रं तु चतुरङ्गुलम् ॥ २३ ॥
आयामेन[25] तु वैपुल्यात् (-पुल्यात् ?) सार्धमङ्गुलमुच्यते ।
अव्यात्तमेवं स्याद् वक्त्रं व्यात्तं द्व्यङ्गुलमुच्यते ॥ २४ ॥
नासावंशसमुच्छ्रायं मूले त्वेकाङ्गुलं मतम् ।
उच्छ्रिताद्[26]द्व्यङ्गुलं चाग्रे करवीरोपमा[27] स्मृता ॥ २५ ॥
अन्तरं चक्षुषोः कार्यं चतुरङ्गुलमानतः ।
द्व्यङ्गुलं चाक्षिकोषं च[28] द्व्यङ्गुलं चान्तरं तयोः[29] ॥ २६ ॥
तारानेत्रविभागेन दृक्तारा पञ्चमांशिका ।
अङ्गुलं नेत्रविस्तारं द्वौणी चार्धाङ्गुला[30] मता ॥ २७ ॥
तत्प्रमाणा भ्रुवोर्लेखा भ्रुवौ नेत्रसमे मते ।
भ्रूमध्यं द्व्यङ्गुलं कार्यं भ्रूदैर्घ्यं चतुरङ्गुलम् ॥ २८ ॥
षट्त्रिंशदङ्गुलायामं[31] मस्तकस्य तु वेष्टनम् ।
मूर्तीनां केशवादीनां द्वात्रिंशद् वेष्टनं भवेत् ॥ २९ ॥
पञ्च नेत्रात् त्वधो ग्रीवाविस्तारात् वेष्टनं पुनः[32] ।
(द्विगुणं तु भवेदूर्ध्वं विस्तृताष्टाङ्गुलं पुनः ।)[33]
ग्रीवात्रिगुण[34]मायामं ग्रीवावक्षोऽन्तरं भवेत् ॥ ३० ॥

[21] कर्तव्यं—B, [22] श्रोत्रः प्रकीर्तितः—A,D,F. [23] कर्णमविद्धं—C. [24] तयार्धं—C. [25] अगमोमेन—B. [26] भद्रिका—B,C. [27] करवीकोपमा—B,C. [28] कोषं तं—B,C. [29] चातुरन्तयोः—B,C, [30] च द्व्यङ्गला—B. [31] षट् द्व्यङ्गुलकमायामं—B,C. [32] भवेत्—B,C. [33] This line is found in B,C,D,F. [34] ग्रीवाभिगुण—B.

स्कन्धावष्टाङ्गुलौ कार्यौ त्रिकलावंशकौ शुभौ ।
सप्ततालौ[35] स्मृतौ बाहू प्रबाहू षोडशाङ्गुलौ ॥ ३१ ॥
त्रिकलं विस्तृतौ बाहू प्रबाहू चापि तत्समौ[36] ।
बाहुदण्डार्धतो[37] ज्ञेयः परिणाहः[38] कला नव ॥ ३२ ॥
सप्तदशा[39]ङ्गुलौ मध्ये कूर्परोर्ध्वेष च षोडश ।
कूर्परस्य भवेन्नाहस्त्रिगुणः सुरसत्तम ॥ ३३ ॥
नाह(ः)प्रवाहमध्ये तु षोडशाङ्गुलमुच्यते ।
अग्रहस्ते[40] परीणाहो द्वादशाङ्गुलमुच्यते ॥ ३४ ॥
विस्तारेण करतलं कीर्तितं तु षडङ्गुलम् ।
दैर्घात् सप्ताङ्गुलं कार्यं मध्यात् पञ्चाङ्गुलंज मता ॥ ३५ ॥
तर्जन्यनामिका चापि तस्मादर्धाङ्गुलं विना ।
कनिष्ठाङ्गुष्ठकौ कार्यौ चतुरङ्गुलसम्मितौ[41] ॥ ३६ ॥
द्विपर्वाङ्गुष्ठकः कार्यः शेषाङ्गुल्यस्त्रिपर्विकाः ।
सर्वासां पर्वणोर्ध्वेन[42] नखमानं विधीयते ॥ ३७ ॥
वक्षसो यत् प्रमाणं च जठरं तत्प्रमाणतः[43] ।
ततो नेत्रान्तरं कार्यं तालमात्रं प्रमाणतः ।[44]
अङ्गुलैकं भवेन्नाभिर्वेधेन च प्रमाणतः ॥ ३८ ॥
नाभिमध्ये परिणाहो द्विचत्वारिंशदङ्गुलैः ।
अन्तरं स्तनयोः कार्यं तालमात्रं प्रमाणतः ॥ ३९ ॥
चुचुकौश पर्वमानौ तु मण्डलं द्विपरं[45] भवेत् ।
चतुःषष्ट्यङ्गुलं कार्यं वेष्टनं वक्षसः स्फुटम् ॥ ४० ॥
चतुर्मुखं तु तदधो वेष्टनं परिकीर्तितम् ।
परिणाहस्तथा कट्यां चतुःपञ्चाशदङ्गुलैः ॥ ४१ ॥

[35] गुप्तनेत्रौ—A,D. [36] च षडङ्गुलौ—B. [37] दण्डोर्धतो—B,C. [38] परिवर्णात्—B,C. [39] सप्तदण्डा—A. ष कूर्परौ द्वौ—D. [40] अर्धहस्तो—B. ज पञ्चाङ्गुला—D. [41] समन्वितौ—B,C. [42] पवनोर्ध्वेन—A. [43] यत्प्रमाणकम्—A,D. [44] B,C. Add this line here. श चिबुकौ—B,C. [45] द्विपर्वं—A.

विस्तारश्चोरुमूले तु प्रोच्यते द्वादशाङ्गुलः।
तस्मादभ्यधिकं मध्ये ततो निम्नतरं[46] क्रमात् ॥ ४२ ॥
विस्तृताष्टाङ्गुलं जानु त्रिगुणं[47] परिणाहतः।
जङ्घामध्ये तु विस्तारः सप्ताङ्गुल उदाहृतः ॥ ४३ ॥
त्रिगुणा (?) परिधिश्चास्य जङ्घाग्रं पञ्च विस्तरात्।
त्रिगुणं (?) परिधिश्चास्य पादौ तालप्रमाणकौ ॥ ४४ ॥
आयामादुच्छ्रितौ पादौ चतुरङ्गुलमेव च।
गुल्फात् पूर्वं तु कर्तव्यं प्रमाणात् चतुरङ्गुलम् ॥ ४५ ॥
त्रिकलं विस्तृतौ पादौ द्व्यङ्गुलोऽ[48]ङ्गुष्ठकः स्मृतः।
पञ्चाङ्गुलं तु नाहोऽस्य[49] दीर्घं चास्यञ प्रदेशिनी ॥ ४६ ॥
अष्टमांशोऽष्टमांशो न (शोनाः?) शेषाङ्गुल्यः क्रमेण तु।
सपादाङ्गुलमुत्सेध्यमङ्गुष्ठस्य[50] प्रकीर्तितम् ॥ ४७ ॥
[पादोनमङ्गुलं कार्यमङ्गुष्ठस्य नखः सदा[51]।
अर्धाङ्गुलं तथा नासाक्रमादूनं तु कारयेत् ॥ ४८ ॥
द्व्यङ्गुलौ[52] वृषणौ कार्यौ मेढ्रं तु चतुरङ्गुलम्।
परिणाहेन कोषाग्रं कर्तव्यं चतुरङ्गुलम् ॥ ४९ ॥
षड्ङ्गुलपरिणाहौ वृषणौ परिकीर्तितौ।]
वृषणालंकृता कार्या प्रसन्नवदनेक्षणा ॥ ५० ॥
प्रतिमा वासुदेवस्य मानेन सुरसत्तम।
एतत् ते लक्षणं प्रोक्तमुद्देशेन मयानघ ॥ ५१ ॥
अनयैव दिशा कार्यं स्वयमभ्युद्य देशिकैः।
लोकेषु लक्षणं दृष्ट्वा हसितार्द्यं निरीक्षणम् ॥ ५२ ॥
तथातथैव कर्तव्यं सूरं (?) यत्नेन देशिकैः।
वासुदेवं तु कुर्वीत चतुर्बाहुं सुरेश्वरम् ॥ ५३ ॥

[46] निम्नतरं—A,B. [47] त्रैगुणा—A ; त्रिगुणः—B,C. [48] व्यङ्गलो—B,C. [49] चास्य —A ; तद्वत्—B,C. ञ दीर्घत्वं (?)—D. [50] ... मङ्गःस्य—B,C. [51] नखामदा—B,C. [52] अङ्गष्ठो—B,C. [ ] Portion within brackets is wanting in D.

दक्षिणोपरि चक्रं तु पद्मं चाधः प्रकल्पयेत् ।
वामोपरि गदा कार्या शङ्खं चाधः सुशोभनम् ॥ ५४ ॥
एतल्लक्षणसंयुक्ता प्रतिमा सन्निधा भवेत् ।
श्रीपुष्टी[53] चापि कर्तव्ये पद्मवीणाकरान्विते ॥ ५५ ॥
ऊरु[54]मात्रोच्छ्रितायामे किंचिदावर्जिते तथा ।
मालाविद्याधरौ[55] कार्यौ प्रभामण्डलसंस्थितौ ॥ ५६ ॥
प्रभां विभूषयेद् यत्नाद् गजव्यालादिभिर्बुधः ।
पद्माभं पादपीठं तु तथा[ट] शोभासमन्वितम् ॥ ५७ ॥

.....

देशा[56]दर्शानुरूपेण कर्तव्यं देशिकोत्तमैः ॥ ५८ ॥
॥ १८ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे अष्टादशः प्रतिमालक्षणपटलः ॥ १८ ॥

ऊनविंशः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि पिण्डिकालक्षणं तव ।
उच्छ्रायं प्रतिमार्धं च[1] दैर्घ्येण प्रतिमासमा ॥ १ ॥
चतुःषष्टिपुटान्[2] कृत्वा पिण्डिकां तत्र कल्पयेत् ।
त्यक्त्वा पंक्तिद्वयं चाधस्तदूर्ध्वं यत्र कोष्ठकम् ॥ २ ॥
समं त[3]दुभयोः पार्श्वे अनन्तं परिमार्जयेत् ।
ऊर्ध्वं पंक्तिद्वयं त्यक्त्वा अधस्ताद् वर्ण[4]-कोष्ठकम् ॥ ३ ॥
अन्तस्थं मार्जयेद् यत्नात् पार्श्वयोरुभयोः समम् ।
तयोर्मध्यगतौ तत्र चतुष्कौ मार्जयेत् ततः ॥ ४ ॥

[53] श्रीयुष्टा—B. [54] तरु—B,C. [55] वेद्याधरौ —B,C. ट यथा—D. [56] दशादर्श—B,C. [1] तु—B,C. [2] पदान्—B,C. [3] समत्व—B,C. [4] अधस्तद् बहुकोष्ठकम्—B,C.

चतुर्धा भाजयित्वा तु ऊर्ध्वं पंक्तिद्वयं बुधः ।
मेखला भागमात्रा[5] स्यात् खातं तस्यार्धमानतः[6] ॥ ५ ॥
भागं भागं[7] परित्यज्य पार्श्वयोरुभयोः समम्[8] ।
दत्त्वा चैकं पदं बाह्ये प्रमाणं कारयेद् बुधः ॥ ६ ॥
त्रिभागेन च भागः स्यादग्रे स्यात् तोयनिर्गमः ।
नानाप्रकारभेदेन भद्रेयं पिण्डिका शुभा ॥ ७ ॥
॥ १६ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे ऊनविंशः पिण्डिकालक्षणपटलः ॥ १६ ॥

विंशः पटलः

श्रीभगवान् उवाच[1]—

अतःपरं प्रवक्ष्यामि लक्ष्मीलक्षणमुत्तमम् ।
अष्टताला तु कर्तव्या देवी लक्ष्मीः[2] सुरेश्वरी ॥ १ ॥
तत्क्रमं सौर[3]काण्डे तु कथयिष्ये तवा[4]नघ ।
नवतालिकक्षेत्रं तु कथ्यमानामितः शृणु ॥ २ ॥
भ्रुवौ यवाधिके कार्ये यवहीना तु नासिका ।
गोलकेनाधिकं वक्त्रमूर्ध्वं तिर्यग्विवर्जितम् ॥ ३ ॥
आयते नयने कार्ये त्रिभागोनैर्यवै[5]स्त्रिभिः ।
तदर्धेन तु वै पुण्यं नेत्रयोः परिकल्पयेत् ॥ ४ ॥
कर्णपाशोऽधिकः कार्यः सृक्कण्या[क] समसूत्रितः ।
नम्रं कलाविहीनं तु कुर्यादंशद्वयं सदा ॥ ५ ॥
ग्रीवा सार्धकला कार्या तद्विस्तारोपशोभिता ।
नेत्रं विना तु विस्तार[6] ऊरू जानू[7] च पिण्डिका ॥ ६ ॥

[5] भागमात्रं—C. ; भोगमात्रा—F. [6] खण्डितस्यार्धमानतः—B. [7] चाग्रं—B,C. [8] रपि—B,C. [1] omitted in A. [2] लक्ष्मी—A,B,C. [3] गौर—A,C. [4] तदा—A. [5] यवं—A ; यव—D [क] सृक्किण्या—A,B,C. [6] विस्तारे—A. [7] ऊरु जानु—C.

अङ्घ्रिपृष्ठे स्फिचे कट्यां यथायोगं प्रकल्पयेत् ।
सप्तांशोनास्तथाङ्गुल्यः दैर्घ्यं विस्कम्भनाहत.[8] ॥ ७ ॥
नेत्रैकवर्जितायामा जङ्घोरू च तथा कटिः ।
मध्यं पार्श्वे च[9] तद् वृत्तं घनं पीनं कुचद्वयम् ॥ ८ ॥
तालमात्रौ स्तनौ कार्यौ कटिः सार्धकलाधिकः ।
शेषमन्यद् यथोद्दिष्टं लक्ष्मीचेयं[ख] प्रकीर्तिता ॥ ९ ॥
सर्वाभरणसम्पन्ना मध्ये क्षामा स्तनोन्नता[10] ।
श्रोणितटप्रविस्तीर्णा कार्या देवी सुरेश्वरी ॥ १० ॥
द्विभुजा कम्बुग्रीवा च विशालाक्षी सुलक्षणा ।
स्तनौ समुन्नतौ कार्यौ कञ्चुकेनावगुण्ठितौ ॥ ११ ॥
नागहस्तोपमौ[11] बाहू ऊरू रम्भासमौ शुभौ ।
नानारत्नोज्ज्वलं पट्टं देव्याः शिरसि दापयेत् ॥ १२ ॥
नानारत्नोज्ज्वला देव्या मेखला श्रोणिसंयुता[12] ।
युक्ता दिव्येन हारेण केयूरकटकोज्ज्वला ॥ १३ ॥
पद्मासना तु कर्तव्या पद्मश्रीफलपाणिका[13] ।
दक्षिणे पुण्डरीकं तु वामहस्ते तु श्रीफलम् ॥ १४ ॥
स्थिता वा त्रिबलिभङ्ग्योतिता[14] वा प्रशस्यते ।
स्त्रियौ पार्श्वद्वये कार्ये शुभे चामरहस्तिके[15] ॥ १५ ॥
भृङ्गारहस्तौ द्वौ नागौ स्नपयन्तौ[16] श्रियं स्थितौ[17] ।
श्रीरियं लक्षणोपेता स्थापिता सर्वकामदा[18] ॥ १६ ॥

.....

सर्वासामेव देवीनामेतत् साधारणं स्मृतम् ॥ १७ ॥
॥ २० ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे विंशः श्री*लक्षणपटलः ॥ २० ॥

[8] दैर्घ्याद् विस्कम्भनाहः—A. दैर्घ्याद् विस्कम्भनाहतः—B,C. [9] पार्श्वे च—A,C,D,F. मध्यपार्श्वे च—B.; पार्ष्णि—var ed. [ख] लक्ष्म्यचेयं—D. [10] तनोन्नता—B,C. [11] हस्तौ परौ—B,C. [12] संयुतम्—B,C. [13] पालिका—A,B. [14] त्रिबलीतस्थशोभिता—A,D [15] हस्तके—B,C. [16] स्नापयन्यौ—A. [17] श्रितौ—B,C. [18] कामदा सदा—B,C. * श्री omitted in F.

एकविंशः पटलः

श्रीभगवान् उवाच—

खगेशस्य प्रवक्ष्यामि तव रूपं सुशोभनम्।
नरतुल्यं भवेद् गात्रं नासिका (कञ्चुकान्विता ॥ १ ॥
पङ्क्तुलोच्छ्रया सम्यक्) चञ्चुरूपेण कल्पिता।
मस्तके कुटिलं[1] केशं नेत्रे चैवास्य वर्तुले ॥ २ ॥
आयतौ द्विमुखौ चास्य पक्षौ कार्यौ सुशोभनौ।
स्कन्धप्रदेशसंलग्नौ ज्वलदग्निसमप्रभौ[2] ॥ ३ ॥
पादयोर्नखराः कार्याः सर्पकुण्डलमण्डिताः।
नूपुरौ तस्य द्वौ नागौ[3] केयूरौ पद्मकस्वनौ[क] ॥ ४ ॥
कटिदेशेऽस्य कुलिकः परिधानस्य वेष्टनम्।
वृश्चिकैः कर्णिका[4] कार्या गरुडस्य महात्मनः ॥ ५ ॥
देवस्य पुरतः स्थाप्यो[5] यष्ट्यां वा मण्डले[6]ऽथवा।
प्रासादस्य प्रमाणेन कार्यो गरुडमण्डपः ॥ ६ ॥

....

यष्ट्याः समुच्छ्रयः कार्यः प्रासादायामतोऽर्धतः[7] ॥ ७ ॥
॥ २१ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
[प्रतिष्ठापञ्चके प्रथमकाण्डे] एकविंशः वैनतेयलक्षणपटलः ॥ २१ ॥

द्वाविंशः पटलः

श्रीभगवान् उवाच—

अत ऊर्ध्वं[1] प्रवक्ष्यामि प्रतिमालक्षणं पुनः।
मासाधिपानां संक्षेपात् तन्निबोध सुरोत्तम ॥ १ ॥

(.....) portion within the brackets is omitted in B, C. [1] मुकुरं—A. [2] समन्वितौ—C. [3] कार्यौ—B, C. [क] खवौ—E, F. [4] कालिका—B. [5] स्थाप्या—B, C. [6] मण्डपे तथा—B, C. [7] प्रासादस्यमतोद्धतः—B, C. [ ] This is found only in E, F.
[1] ऊर्ध्वं--omitted in B, C.

आदिमूर्तिर्वासुदेवः[2] सङ्कर्षणमथापि च[3]।
सङ्कर्षणोऽथ प्रद्युम्नं सोऽनिरुद्धमथासृजत्[*] ॥ २ ॥
चतुर्मूर्तिः परं[4] प्रोक्तः[5] एकैको भिद्यते त्रिधा।
केशवादिप्रभेदेन मूर्तिद्वादशकं स्मृतम् ॥ ३ ॥
पङ्कजं दक्षिणे दद्यात् पाञ्चजन्यं तथोपरि।
वामोपरि गदा यस्य चक्रं चाधो व्यवस्थितम् ॥ ४ ॥
आदिमूर्तेस्तु भेदोऽयं केशवेति प्रकीर्त्यते[ख]।
अधरोत्तरभागेन[6] कृतमेतत् तु यत्र वै ॥ ५ ॥
नारायणाख्या सा मूर्तिः स्थापिता भुक्तिमुक्तिदा।
सव्याधः पङ्कजं यस्य पाञ्चजन्यं तथोपरि ॥ ६ ॥
दक्षिणोर्ध्वं गदा यस्य चक्रं चाधो व्यवस्थितम्।
आदिमूर्तेस्तु भेदोऽयं माधवोऽयं प्रकीर्त्यते[7] ॥ ७ ॥
दक्षिणाधः स्थितं चक्रं गदा यस्योपरि स्थिता।
वामोर्ध्व[8]संस्थितं पद्मं शङ्खं चाधो व्यवस्थितम् ॥ ८ ॥
सङ्कर्षणस्य भेदोऽयं गोविन्देति प्रकीर्त्यते[ग]।
दक्षिणोपरि पद्मं तु गदा चाधो व्यवस्थिता ॥ ९ ॥
वामोर्ध्वं पाञ्चजन्यं च[9] चक्रं चाधो व्यवस्थितम्।
सङ्कर्षणप्रभेदोऽयं[10] विष्णुरित्यभिधीयते[11] ॥ १० ॥
दक्षिणोपरि शङ्खं च[12] चक्रं चाधः प्रदृश्यते[घ]।
वामोपरि तथा पद्मं गदा चाधः प्रदृश्यते[13] ॥ ११ ॥
मधुसूदननामायं भेदः सङ्कर्षणस्य तु।
दक्षिणोर्ध्वं गदा यस्य पङ्कजं चाप्यधः स्थितम्[14] ॥ १२ ॥

[2] वसुदेव—C. [3] .. सङ्कर्षणमथाश्रितः—E. * This line is omitted in A. ...मथासृजत्—E F. [4] चतुर्मूर्तिपरं—A, F. [5] प्रोक्तं—B [ख] प्रकीर्तितः—E, F. [6] अथ चोत्तरभागेन—B, C. [7] माधवेति प्रकीर्तितः—B C. [8] वामोर्ध्व—B. [ग] प्रकीर्तितः—E. F. [9] तु—B, C. [10] ...स्य भेदोऽयं—A. [11] शस्यते—C, E, F. [12] तु—C. [घ] विद्यते—F. भिद्यते—E. [13] प्रशस्यते—B, C. [14] स्थितः—B, C.

वामोर्ध्वं संस्थितं चक्रमधः शङ्खं[15] प्रदृश्यते ।
ब्रह्माण्डंग[16] वामपादं दक्षिणं शेषपृष्ठगम् ॥ १३ ॥
बलिवञ्चनसंसक्तं[17] वामनं[18] चाप्यधः स्थितम् ।
त्रिविक्रमेति सा मूर्तिः स्थापिता राज्यभोगदा ॥ १४ ॥
वामोर्ध्वे[19] कौमूदी यस्य पुण्डरीकमधःस्थितम् ।
दक्षिणोर्ध्वं सहस्रारं पाञ्चजन्यमधःस्थितम् ॥ १५ ॥
सप्ततालप्रमाणं तु वामनं कारयेत् सदा ।
ऊर्ध्वं दक्षिणतश्चक्रमधः पद्मं व्यवस्थितम् ॥ १६ ॥
वामोर्ध्वे कौमुदी यस्य पाञ्चजन्यमधःस्थितम् ।
पद्मा पद्मकरा वामे पार्श्वे यस्य व्यवस्थिता ॥ १७ ॥
स्थितो वाप्युपविष्टो वा सानुरागो विलासवान् ।
प्रद्युम्नस्य हि भेदोऽयं[20] श्रीधरेति प्रकीर्त्यते ॥ १८ ॥
दक्षिणोर्ध्वं महाचक्रं कौमुदी तदधःस्थिता ।
वामोर्ध्वे नलिनं यस्य अधः शङ्खं विराजते ॥ १९ ॥
हृषीकेशेति विज्ञेयः स्थापितः सर्वकामदः ।
दक्षिणोर्ध्वे[21] पुण्डरीकं पाञ्चजन्यमधस्तथा[ङ] ॥ २० ॥
वामोर्ध्वे संस्थितं चक्रं कौमुदी तदधःस्थिता ।
पद्मनाभेति सा मूर्तिः स्थापिता मोक्षदायिनी ॥ २१ ॥
दक्षिणोर्ध्वं[22] पाञ्चजन्यमधस्तात् तु कुशेशयम् ।
सव्योर्ध्वं कौमुदी देवी हेतिराज[23]मधःस्थितम् ॥ २२ ॥
अनिरुद्धस्य भेदोऽयं दामोदर इति स्मृतः ।
एतेषां तु स्त्रियौ[24] कार्ये पद्मवीणाधरे शुभे ॥ २३ ॥

[15] शङ्खः—B, C. [16] ब्रह्माशुगं—B, C. ब्रह्माण्डं—A. [17] संयुक्त—A. [18] वारण—A. [19] वामोर्ध्वं—A. [20] प्रभेदोऽयं—C. [21] दक्षिणोर्ध्वं—C. [ङ] स्थिता—E, F. [22] दक्षिणार्धं—A. [23] हेतिराज omitted in C. [24] मूर्तिपे—B, C.

एतत् समासतः प्रोक्तं मूर्तीनां लक्षणं मया ।
मत्स्यादीनां प्रवक्ष्यामि विशेषेण तु लक्षणम् ॥ २४ ॥
॥ २२ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
द्वाविंशः केशवादिप्रतिमालक्षणपटलः ॥ २२ ॥

त्रयोविंशः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि मत्स्यादीनां तु लक्षणम् ।
पट्त्रिंशदङ्गुलायामं तदर्धेन[1] तु विस्तृतम् ॥ १ ॥
दैर्घ्याष्टमांशसंयुक्तं[2] पुच्छवक्त्रं तु कारयेत् ।
रोहितं[3] विवृतास्यं तु द्वादशाङ्गुलमानतः[4] ॥ २ ॥
कलैकं पृष्ठ[5]रोमं तु पुच्छोर्ध्वं क्रोडगं तथा ।
कृतस्यैवंविधस्येह रोहितस्य मुखोद्गतम्[6] ॥ ३ ॥
नारायणं तु कुर्वीत आगुल्फं तन्मुखोद्गतम्[7] ।
एवं[8] तु मत्स्यमादाय[9] स्थापयेद् यस्तु मानवः ॥ ४ ॥
सर्वज्ञत्वं भवेत्तस्य सर्वापन्मुक्तिरेव च ।
दैर्घ्यात् त्रितालसंयुक्तं[10] तदर्धं परिमण्डलम् ॥ ५ ॥
चतुश्चरणसुश्लिष्टं चतुरङ्गुलमात्रया ।
कपोल[11]द्वयमध्यात् तु गोविन्दं तु समुद्गतम् ॥ ६ ॥
कृत्वा वा[12] गुल्फपर्यन्तमुद्गच्छन्तं सुरोत्तम ।
भूकूर्मं[13] कारयित्वैवं[14] कूर्मं वा स्थापयीत यः ॥ ७ ॥

[1] ऊर्ध्वेन तु सुविस्तृतम्—B, C. [2] संयुक्तां—B, C. [3] रोहिता—A. [4] ...नामतः—B. [5] प्रष्ठ—B, C. [6] मुखोदितं—B, मुखोदयं—C. [7] यथोद्गतम्—B, C.; this line is omitted in E. F. [8] एकं—B, C. [9] एवं च—F; एवं त्वं मत्स्यमत्स्यम्वा—D, E. [10] द्वितील—B, C. [11] कपाल—A, D, E, F. [12] वै—B, C. [13] भूद्भूर्मं—B, C.; भूतकूर्मं—D, F.; भूकूर्मं—E. [14] कारयेद् वैवं—C.

स्ववंशोद्धरणं तस्य जायते मुक्तिरेव च ।
चक्रं[15] कलाष्टकायामं प्रथिमा स्याद् द्विगलोकम् ॥ ८ ॥
हनू सप्ताङ्गुले चास्य सृक्कणी द्व्यङ्गुले मते ।
सप्ताङ्गुलं[16] मुखं प्रोक्तं वक्त्रौ सार्धकलौ[17] द्विजौ ॥ ९ ॥
नासारन्ध्रं भवेन्नेत्रं यवहीनेऽक्षिणी मते ।
किञ्चिद्वक्रे[18] स्मृते श्रोत्रे त्रिगोलक[19]-समायते ॥ १० ॥
चतुष्कलं कर्णमध्यं तदर्धेन तदुच्छ्रितम् ।
वस्वङ्गुला भवेद् ग्रीवा नेत्रैकं चोन्नता तु सा ॥ ११ ॥
शेषं नृसिंहवत् कार्यं वराहस्य तु[20] विग्रहम् ।
शेषाहिविधृतं पादं बाहुना धारयन् धराम् ॥ १२ ॥
शङ्खं वामे तथा लक्ष्मीं गदाचक्रे तु दक्षिणे ।
एवं नववराहं च[21] कृत्वा यः स्थापयेन्नरः ॥ १३ ॥
भवोदधिसमुत्तारं[22] राज्यं वा हतकण्टकम् ।
प्राप्नुयान्नात्र सन्देहो ह्यमुत्रैहैव[23] वा भुवि ॥ १४ ॥
तिर्यङ्नृसिंहदेवस्य तथा विपुलमाननम्[च] ।
वर्तुलेऽस्य तथा नेत्रे स्कन्धौ तालमितौ शुभौ ॥ १५ ॥
भ्रुवे व्याकुञ्चिते वक्त्रं विवृतं चोग्रदंष्ट्रकम् ।
लेलिहाना तथा जिह्वा समुद्धतसटं[छ] शिरः ॥ १६ ॥
दंष्ट्रे अङ्गुलनिर्याते रक्ताग्रे च सिते तथा ।
त्रिकलाभ्यधिकं[24] वक्त्रः पञ्च नेत्राधिका कटिः ॥ १७ ॥
त्रिकलाभ्यधिके[25] चोरू जानू चापि कलाधिके ।
जङ्घे सार्धकले मध्ये विस्तृतेऽग्रे[26] विभागतः ॥ १८ ॥

[15] चक्रं—A वक्रं—var. ed. [16] सप्ताङ्गुल—A. [17] तत् सार्धकलौ—B, C. [18] वक्रे—B, C. [19] द्विगोलक—B, C, E. F. [20] तु omitted in B, C. [21] देवं वराहं तु—B. C. [22] .. समायुक्तं—B, C. [23] अन्यत्रैहैव—B, C. [च] निश्चयमाननम् –E. F. [छ] समुद्गतसटं—E, F. [24] ...यधिकं—B, C. [25] ...भ्यधिका—A, अधिका—B, C. [26] विस्तृताग्रे—A, B.

ऊर्ध्वौ किञ्चित् स्मृतौ पादौ बाहुमूले कलाधिकौ।
किञ्चित् किञ्चित् तथा हीनौ पयन्ते चोपबाहुकौ ॥ १६ ॥
वपुरित्थं नृसिंहस्य कुर्याद् देशिकसत्तमः।
जानुदेशे च संस्थाप्य विदारित[27]महासुरम् ॥ २० ॥
भूषितं वैजयन्त्या तु मालया[28] श्रीसमन्वितम्।
खड्गचक्रधरं[29] देवं नृसिंहं कारयेद् बुधः ॥ २१ ॥
स्थापयेत् पापनाशाय जयाय नरकेशरीम् (?)ज।
भुजं[30] त्रिगोलकायामं वक्षो विस्तारशोभितम् ॥ २२ ॥
पाणिपादं तुरीयांशं प्रवृद्ध[31]-शिरसं तथा।
ऊर्वङ्घ्रि द्वितयायाम[32]-विहीनमथयुग्मकम्झ ॥ २३ ॥
कटिस्फिक्पार्श्वनाभीषु तदूर्ध्वं[33] वामनं बुधः।
कृत्वा संस्थापयेद् देवं[34] मोहनाशाय[35] सर्वथा ॥ २४ ॥
जामदग्न्यं तु कुर्वीत जटामुकुट[36]-मण्डितम्।
चतुर्बाहुं महाभागं सर्वक्षत्रान्तकं विभुम्[37] ॥ २५ ॥
दक्षिणे परशुं हस्ते वामे दद्यात् तथा धनुः।
खड्गं[38] दक्षिणहस्ते तु वामहस्ते तु खेटकम् ॥ २६ ॥
कुठारहस्तं द्विभुजं कुर्याद् वा रेणुकासुतम्[39]।
कृत्वैवं जामदग्न्यं तु स्थापयेद् यस्तु मानवः ॥ २७ ॥
स विष्णुं[40] प्राप्नुयाच्छीघ्रं कामांश्च मनसेप्सितान्।
कुर्याद् दाशरथिं रामं सप्ततालं[41] चतुर्भुजम् ॥ २८ ॥
शरकार्मुकहस्तं तु शङ्खचक्रधरं शुभम्।
दक्षिणोर्ध्वं भवेच्चक्रं वामोर्ध्वं शङ्खमेव च ॥ २९ ॥

[27] विभावित—B ; बितारित—C. [28] लीलया—B. [29] शङ्खचक्रधरं—C. [30] भूजं—B, C. — ज नरकेशरी—D. [31] प्रवृद्धि—C. [32] यामं—B, C. झ मुखयुग्मकम्—All except E. [33] तद्वृद्धं—A. [34] दैवं—B, C. [35] मोहनार्थाय—A. [36] मकुट—C. [37] प्रभुम्—B, C. [38] शङ्ख—C. [39] रेणुक—B, C. [40] वित्तं—A. [41] दशतालं—B, C.

दक्षिणाधो भवेद् बाणो[42] वामाधो धनुरेव[43] च ।
द्विभुजं शरहस्तं वा रामं कुर्यात् सकार्मुकम् ॥ ३० ॥
कृत्वैवं राघवं रामं सर्वलक्षणसंयुतम् ।
क्रूर[अ]-शत्रुविनाशाय स्थापयेत् सर्वकामदम् ॥ ३१ ॥
तृतीयं च तथा[44] रामं चतुर्बाहुं शृणुष्व मे ।
वामोर्ध्वं लाङ्गलं[45] दद्यादधः शङ्खं[46] सुशोभनम् ॥ ३२ ॥
मुपलं दक्षिणोर्ध्वं तु चक्रं चाधः सुशोभनम् ।
गदां कृपाणं वा दद्यात् संस्थाने[47] शङ्ख[48]चक्रयोः ॥ ३३ ॥
कृत्वैवं बलदेवं तु यो नरः स्थापयेत् प्रभुम्[49] ।
पुत्रं ददाति तस्याथ विपक्षांश्च जयत्यसौ[50] ॥ ३४ ॥
दशतालं तथा बुद्धं[51] पद्मासनगतं हरिम् ।
प्रलम्ब[52]श्रवणं कुर्याच् चीवरा[53]लंकृतं तथा ॥ ३५ ॥
मलिनाभं समाधिस्थं पद्मास्यं पद्मलोचनम् ।
समाधिस्थोत्तानपाणिं योगदृष्टिसमन्वितम् ॥ ३६ ॥
स्थापयेत् रूपकामस्तु[54] पितेव जगतः स्थितम्[55] ।
कल्किनं तु चतुर्बाहुं बद्धतूणं[56] धनुर्धरम् ॥ ३७ ॥
शङ्खचक्रधरं कुर्यात् तथा खड्गधरं प्रभुम् ।
द्विभुजं वा हयारूढं[57] खड्गपाणिं सुरेश्वरम् ॥ ३८ ॥

....

कल्किनं स्थापयेद् वैनं[58] शक्रस्थानं लभे[59]न्नरः ॥ ३९ ॥
॥ २३ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे त्रयोविंशः दशावतारप्रतिमालक्षणपटलः ॥ २३ ॥

[42] बाणं—B, C. [43] धनुमेव—B, C. [अ] देव—F. [44] यथा—A. [45] लाङ्गलं—B. [46] शङ्खं च शोभनं—B. [47] संस्थाने omitted in B, C. [48] शक्ति—A F. [49] विभुम्—B, C. F. [50] जयन्त्वसौ—C. [51] बुद्धं—A. [52] प्रणकः—B, C. [53] चीरबाणंकृतं—A. [54] कामंतु—A, B, C. [55] पतिम् B, C. [56] बहुतूणधरं—B; बद्धतुणधरं—C. [57] महिषारूढं—A. [58] चैनं—B. स्थापयित्वैवं—F. [59] भवे—B, C.

चतुर्विंशः पटलः

श्रीभगवान् उवाच—

अधुना वासुदेवादीन् प्रवक्ष्यामि शृणुष्व मे ।
आदिमूर्तिर्वासुदेवः पूर्वमेवोदितो मया ॥ १ ॥
दक्षिणोर्ध्वं गदा यस्य वामोर्ध्वे चक्रमुल्बणम्[1] ।
ब्राह्मणौ पार्श्वगौ नित्यं शेषमन्यच् च पूर्ववत् ॥ २ ॥
द्वितीयो वासुदेवोऽयं द्वापरादौ स उच्यते ।
द्विभुजो वाथ कर्तव्यो वामे शङ्खधरः प्रभुः[2] ॥ ३ ॥
वरदो दक्षिणेनाथ वासुदेवे द्विधोदितः[3] ।
बलदेवश्चतुर्बाहुः कुण्डलैकविभूषितः ॥ ४ ॥
लाङ्गली मुषली देवो गदापद्मधरो[4] विभुः ।
शङ्खचक्रगदापाणिः कर्तव्यो वरदोऽथवा ॥ ५ ॥
प्रद्युम्नस्तु चतुर्बाहुः शङ्खचक्रधरः शुभः ।
चक्रं दक्षिणहस्तेऽस्य वामहस्ते धनुस्तथा ॥ ६ ॥
शङ्खं च दक्षिणे दद्याद् गदां वामे प्रदापयेत्[5] ।
प्रद्युम्नं कारयेद् देवं सर्वलक्षणसंयुतम् ॥ ७ ॥
स्त्रियौ चैवास्य[6] कर्तव्ये खड्गचर्मधरे[7] शुभे ।
रतिप्रीत्योर्मध्यगतं कम्बुग्रीवं सकार्मुकम् ॥ ८ ॥
द्विभुजं शरहस्तं वा प्रद्युम्नं कारयेद् बुधः ।
अनिरुद्धः कम्बुग्रीवश्चतुर्बाहुः सुभूषितः[8] ॥ ९ ॥
दक्षिणेऽस्य गदा देया शङ्खचक्रौ तु[9] वामतः ।
दक्षिणे च तथा पद्ममनिरुद्धस्य[10] दापयेत् ॥ १० ॥
नारायणश्चतुर्बाहुः[11] कार्यस्तल्लक्षणं मया ।
मूर्तिद्वादशके पूर्वं कीर्तितं ब्रह्मणः[12] शृणु ॥ ११ ॥

[1] ...मेव च—B, C. [2] शुभः—B, C. [3] द्विधा मतः—B, C. [4] गदाचक्रधरा—B, C. [5] च दापयेत्—C. [6] वै वास्य—B, C. [7] शङ्खचक्रधरे—B, C. [8] सुशोभितः—B, C. [9] ते—B, C. [10] पद्मोऽस्य—B. [11] नारायणं चतुर्बाहुं—B, C. [12] ब्राह्मणः—B, C.

चतुर्मुखश्चतुर्बाहुर्ब्रह्मजठरमण्डलः[13] ।
ऊर्ध्वं बद्ध[14]जटाजूटो लम्बकूर्चः समेखलः[15] ॥ १२ ॥
शोभनं दक्षिणे हस्ते दद्यादस्याक्षसूत्रकम्[16] ।
स्रुवं च दक्षिणे दद्याद् वामहस्ते तु कुण्डिकाम् ॥ १३ ॥
आज्यस्थालीं कुशोपेतां वामहस्ते नियोजयेत् ।
शङ्खचक्रगदापाणिः कार्यो वाथ चतुर्मुखः ॥ १४ ॥
सरस्वती च सावित्री वामदक्षिणसंस्थिते ।
कर्तव्या मुनयो वाथ परिवार्य व्यवस्थिताः ॥ १५ ॥
विनिविष्टः[17] सदा ब्रह्मा कार्यो[18] नेष्टस्तथा[19]न्यथा ।
नृसिंहवत् स्वमात्रा तु किञ्चिदभ्यधिकः स तु ॥ १६ ॥
विष्णुरष्टभुजः कार्यश्चतुर्बाहुरथापि वा ।
वैनतेयगतः सौम्यः सन्दष्टोष्ठपुटोऽपि वा[20] ॥ १७ ॥
खड्गं गदां शरं दद्याद् दक्षिणे वरदोऽपरः ।
कार्मुकं खेटकं चक्रं शङ्खं वामेऽस्य दापयेत् ॥ १८ ॥
चतुर्भुजे गदा देया दक्षिणे वरदोऽपरः ।
वामे शङ्खं च चक्रं च विष्णुरेवं द्विधा मतः ॥ १९ ॥
नरसिंहश्चतुर्बाहुः शङ्खचक्रगदाधरः ।
शङ्खचक्रधरो वापि विदारितमहासुरः ॥ २० ॥
चतुर्बाहुर्वराहस्तु शेषपाणिपदे धृतः ।
धारयन् बाहुना[21] पृथ्वीं वामेन[22] कमलामथ ॥ २१ ॥
पादलग्ना धरा कार्या यदा लक्ष्मी भुजस्थिता ।
वराहं कारयेद् देवं[23] शङ्खचक्रगदाधरम् ॥ २२ ॥

[13] This line is partially omitted in C. [14] ऊर्ध्वमूर्ध्वं—B, C, E, F. [15] सुकूर्चः ससुमेखलः—B. [16] च दक्षसूत्रकम्—B, C.; साक्षतसूत्रकम्—A. [17] विनिविष्टं—A. [18] कार्या—A. [19] .. मथो—A. [20] This line is omitted in A; in B, C. it is placed as the last hemistich of verse 16. Verses 16 and 17 omitted in E, F. [21] धारयेद् बाहुनं—B, C. [22] वामनं—B, C. [23] कारयेदेवं—B.

सप्ततालौ प्रशस्येते वराह-नरकेशरी (?)।
नवतालावभ्यधिकौ[24] पुरस्तात् कथितौ तव ॥ २३ ॥
॥ २४ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
चतुर्विंशः नवव्यूहप्रतिमालक्षणपटलः ॥ २४ ॥

पञ्चविंशः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि प्रतिमालक्षणं पुनः।
अष्टबाहुं बुधः कुर्याद् देवं त्रैलोक्यमोहनम् ॥ १ ॥
गरुडासनगं देवं प्रथमे[1] वयसि स्थितम्।
चक्रं खड्गं च[2] मुषलं साङ्कुशं दक्षिणे न्यसेत् ॥ २ ॥
शङ्खं शार्ङ्गं[3] गदां[4] पाशं वामहस्तेषु विन्यसेत्।
लक्ष्मी सरस्वती कार्ये पद्मवीणासमन्विते ॥ ३ ॥
पुरुषोत्तमभेदांस्तु[5] वर्णयिष्यामि सत्तम।
सङ्कर्षेऽवसर[6]प्राप्तान् स्थापने तु यथा[7]विधि ॥ ४ ॥
विंशबाहुं[8] विश्वरूपं कुर्यात् तल्लक्षणं शृणु।
चक्रं खड्गं च[9] मुषलमङ्कुशं पट्टिशं तथा ॥ ५ ॥
मुद्गरं च तथा पाशं[10] शक्तिं शूलं शरं तथा।
दक्षिणेषु प्रदद्याद् वै[11] वामेषु शृणु साम्प्रतम् ॥ ६ ॥
शङ्खं शार्ङ्गं तथा[12] पाशं तोमरं लाङ्गलं तथा।
परशुं छुरिकां दण्डं चर्म प्रक्षेपणं तथा ॥ ७ ॥

[24] ...वत्यधिकौ—B C [1] प्रथमं—A. [2] शङ्खं चक्रं च—B, C. चक्रं शङ्खः च—E. [3] शङ्खशार्ङ्ग—A. [4] गदा—B [5] भेदांस्ते—B; भेदास्ते—C. [6] ...वसरः - B, C [7] तथा —B, C. [8] विंशद्बाहुं B, C, F. [9] शङ्खं च—B, C. [10] शङ्खं—B, C. [11] वै omitted in B, C. [12] गदा—B, C.

(नृसिंहोक्तं[c] परं मानं विश्वरूपस्य कीर्तितम् ।)[13]
चतुर्मुखं दक्षिणेऽस्य त्रिनेत्रं वामतो न्यसेत् ।
स्तुवन्तो मुनयः कार्या विद्रवन्तो निशाचराः ॥ ८ ॥
वामपार्श्वेन शयितं कारयेज् जलशायिनम् ।
शेष[14]-पर्यङ्कगं देवं चतुर्बाहुं जनार्दनम् ॥ ९ ॥
श्रिया धृतैकचरणं सर्वालंकारभूषितम् ।
देवीभिर्विमलाद्याभिः सेव्यमानमितस्ततः[15] ॥ १० ॥
नाभ्युत्थ[16]पङ्कजारूढ पितामहसमन्वितम् ।
रुद्रार्धदेहं वा कुर्याच् चतुर्बाहुं जनार्दनम् ॥ ११ ॥
ईशानं दक्षिणे पार्श्वे देवं शूलविधारणम्[17] ।
गदाचक्रधरं चैव[18] मुकुटेन विभूषितम् ॥ १२ ॥
जटाचन्द्र[19]धरं रौद्रं[20] वैष्णवं रत्नमण्डितम् ।
कुण्डलोद्द्योतितं[21] चैकमपरं नागकुण्डलम् ॥ १३ ॥
व्याघ्रचर्मपरीधानमपरं वस्त्र[22]भूषितम् ।
ब्रह्मसूत्रधरं चैकमन्यन्नागोपवीतिनम्[23] ॥ १४ ॥
गौरी चैकेन पार्श्वेन लक्ष्मी चैकेन संस्थिता ।
एवं लक्षणसंयुक्तं कारयेद्धरिशङ्करम् ॥ १५ ॥
ममैव[24] लक्षणं वक्ष्ये तन्निबोध सुरोत्तम ।
वराहवन्मुखं कार्यमायामाद् विंशदङ्गुलम् ॥ १६ ॥
वक्त्रदेशे हनू कार्ये[25] आयते तु[26] चतुष्कले[27] ।
सार्धकलं तु सृक्कण्ये (?) ततश्चाष्टाङ्गुलं मुखम् ॥ १७ ॥

[c] नृसिंहान्तं —B, C. [13] B, C, D, E, F. have this additional line here. [14] शेषं—B. [15] Verses 10 and 11 are omitted in B. [16] नाभ्युत्थं —C ; अमुष्य — A, D. यन्मुख —F. ; खन्मुख —E. [17] शूलं विधारिणम् —B, C. [18] चास्य —A. [19] चक्र — A, B, C, E, F. [20] देवं —A. E. F. [21] कुण्डलद्योतितं —B, C. [22] श्रस्त —B ; प्रस्त—D. [23] ब्रह्मसूत्रधरं चैव मालां —B. नागोपवीतकम् All except E. [24] मयैव —A ; मायैव — B ; ममेव—C. [25] हनुः कार्य —C. [26] च—A. [27] सुपुष्कलं —A, D.

द्व्यङ्गुलं घ्राणरन्ध्रं तु कुटिलं त्र्यङ्गुलायतम्[28] ।
आयामाद् द्व्यङ्गुले कार्ये द्व्यङ्गुले चाधिकेऽक्षिणी ॥ १८ ॥
पञ्चाङ्गुलौ स्मृतौ कर्णौ त्र्यङ्गुलं[29] विस्तृतौ[30] तु तौ[ठ] ।
कर्णान्तरं[31] चतुर्नेत्रं कलैकं चोन्नतं तु[ड] तत् ॥ १९ ॥
तलैकविस्तारा[32] ग्रीवा यवाङ्गुलसमा मता[33] ।
घण्टाविभूषिता ग्रीवा शिरश्चालकभूषितम् ॥ २० ॥
शेषं चतुर्भुजं देहं नृसिंहस्येह[34] कीर्तितम् ।
वामहस्तेऽथ कुर्वीत वेदाश्चत्वारः सुव्रत ॥ २१ ॥
त्वं चा[35]प्यग्रे स्थितः कार्यो वेदग्रहपुरःसरः ।
अपरे वामहस्ते तु शङ्खं दद्यात् सुशोभनम् ॥ २२ ॥
दक्षिणे द्वितये कुर्याद्[36] गदां चक्रं विचक्षणः ।
शेषनागधृतं पादं वामं कार्यं ममानघ ॥ २३ ॥
दक्षिणं कूर्मपृष्ठस्थं पादं कुर्यात् सदैव मे[37] ।
शङ्खचक्रगदावेदपाणिं वा कारयीत माम् ॥ २४ ॥
अश्ववक्त्रं चतुर्बाहुमेवमेव[38] व्यवस्थितम् ।
पुष्करासनमध्यस्थं देवीद्वितयसंयुतम्[39] ॥ २५ ॥

....

एवं ममार्चा कर्तव्या सर्वज्ञत्वमभीप्सुभिः ॥ २६ ॥
॥ २५ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे पञ्चविंशः प्रतिमालक्षणपटलः ॥ २५ ॥

[28] द्व्यङ्गलायतम्—B, C. [29] द्व्यङ्गुलं—B, C. [30] विस्तृतं—B, C. [ठ] ततः—E, F. [31] वर्णान्तरं—A. [ड] च—E, F. [32] ...विस्तृता—B, C. अनेकविस्तारा—E, F. [33] पञ्चाङ्गुलसमायता—B, C, E. F. [34] ...स्यैव—B; ...स्येव—C. [35] पञ्चाप्यग्रे—B, C. [36] दद्यात्—B, C. [37] सदैवतम्—A, D, E, F. [38] ..मेवमेवं—B, C. [39] देवं द्वितयसंस्थितम्—B, C.

षड्विंशः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि ग्रहाणां लक्षणं तव ।
आदित्यो द्विभुजः प्रोक्तो युवा लक्षणलक्षितः ॥ १ ॥
कम्बुग्रीवः पीनवक्षा अलकालंकृतः शुभः ।
सर्वाभरणसंयुक्तो दीप्तः सौम्यो द्विलोचनः ॥ २ ॥
पद्मस्थः खेटकाहस्तः[1] पादो वा (?) रथसंस्थितः ।
एकचक्रो रथस्तस्य सप्ताश्वोऽरुणसारथिः ॥ ३ ॥
हस्तयोः पङ्कजौ कार्यौ तस्य स्कन्धमितौ शुभौ ।
दण्डपिङ्गलकौ कार्यौ प्रतिहारौ[2] विभूषितौ ॥ ४ ॥
खड्गखेटकाहस्तस्तु रथस्थो दण्डनायकः ।
मसीभाजनहस्तस्तु[3] पिङ्गलो लेखनीकरः ॥ ५ ॥
संज्ञा[4] च निष्कृता चैव कार्ये पार्श्व[5]द्वये स्थिते ।
शरकार्मुकहस्ते ते वामदक्षिणसंस्थिते[6] ॥ ६ ॥
आदित्यं कारयेद् देवं सर्वरोगविनाशनम् ।
चित्रे तु लेखयेद् भानुं कञ्चुका[7]गुप्तविग्रहम् ॥ ७ ॥
भेदानस्यापरान् सौर्ये[8] कथयिष्यामि तेऽखिलान्[9] ।
सोमः सौम्याननः कार्यो द्विभुजा[10]लंकृतः शुभः ॥ ८ ॥
निविडाङ्गो[11]ऽङ्गारकस्तु सर्वलक्षणसंयुतः ।
कामरूपो बुधः कार्यो गुरुः सौम्योऽवसंस्थितः ॥ ९ ॥
काणस्तु[12] भार्गवः प्रोक्तः खञ्जस्तु सौरि[13]रुच्यते ।
करालास्यः[14] स्मृतो राहुश्छिन्नदेहः कृताञ्जलिः ॥ १० ॥

[1] खेट्टिकागुप्तः—A ; खेउकागुप्तः—C, D, E, F. [2] प्रतीहारौ—A. [3] ...हस्तं तु—B, C. [4] राज्ञी —A, D, E, F. [5] पार्श्वं—A. [6] This line is omitted in A, D, E, F. [7] कञ्चुवी'—B, C. [8] ...स्यापरान् दौर्ये—A ; [9] ...खिलानां—B, C. [10] द्विभुजो—B. [11] विडालाङ्गा —B, C. [12] कालस्तु —A, [13] शिवि—A. [14] करालस्थः —A.

भुजगार्धतनुः केतू रूपेणातीव धूसरः[15] ।
सव्योरुस्थितदोर्दण्डा दक्षिणेनाभयप्रदाः[16] ॥ ११ ॥
द्विभुजालंकृताः सर्वे ग्रहाः कामफल[17]प्रदाः ॥ १२ ॥
॥ २६ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे षड्विंशः ग्रहप्रतिमालक्षणपटलः ॥ २६ ॥

सप्तविंशः पटलः

श्रीभगवान् उवाच—

ग्रहाणां लक्षणं प्रोक्तं मातॄणां शृणु साम्प्रतम् ।
वीरभद्रो वृषारुढो (वीणाहस्तस्त्रिलोचनः ॥ १ ॥
मातॄणामग्रतः कार्यो जटाखण्डेन्दुमण्डितः ।
द्विभुजा च[1] चतुर्वक्त्रा वेधसो वेश[2]धारिणी ॥ २ ॥
हंसारूढा च[3] पद्मस्था[4] सर्वाभरणभूषिता[5] ।
तस्या दक्षिणहस्ते तु प्रदातव्या गुणास्तदा[6] ॥ ३ ॥
कमुण्डलु[7]र्वामहस्ते योगपट्टेन वेष्टिता ।
चतुर्भुजा तु रुद्राणी वृषारूढा त्रिलोचना ॥ ४ ॥
शूलं शरं दक्षिणे तु वामे वज्रं च[8] कार्मुकम् ।
स्कन्दरूपा च कौमारी बालाकारा सुमांसला ॥ ५ ॥
मयूरवर[9]मारूढा) द्विभुजा शक्ति[10]धारिणी ।
चतुर्भुजा वैष्णवी स्याच्छङ्खचक्रगदायुधा ॥ ६ ॥

[15] धूरसः—B. [16] साव्यवस्थिता दोर्दण्डा दक्षिणोभयप्रदाः—B. [17] . कुल—B.
( ) Portions within brackets are omitted in E, F. [1] तु—B, C.
[2] वेध—A. [3] हंसारुढाथ—B, B. [4] पद्मस्थ—B, C. [5] .. संयुक्ता—B, C.
[6] ...तथा—B , C. [7] कमण्डलुं—A. [8] चक्रं च—B, C. [9] मयूरपर—B, C.
[10] शान्ति—A.

पक्षिराजसमारूढा सर्वाभरणभूषिता[11] ।
वराहास्या तु वाराही बृहत्कण्ठा महोदरा[12] ॥ ७ ॥
महिषस्था दण्डहस्ता शङ्खचक्रगदायुधा[13] ।
सप्ततालां तु वाराही[14] कर्तव्या शुभलक्षणा ॥ ८ ॥
माहेन्द्री तु[15] गजारूढा द्विभुजा वज्रधारिणी ।
नवयौवनसंयुक्ता[16] भूषिता[17] बहुलोचना ॥ ९ ॥
चतुर्भुजा तु चामुण्डा कोटराक्षी त्रिलोचना ।
निर्मांसा अस्थिसारा च[18] ऊर्ध्वकेशी कृशोदरी[19] ॥ १० ॥
नागयज्ञोपवीताङ्गी द्वीपिचर्मोत्तरच्छदा ।
मुण्डमालाधरा देवी अस्थिखण्डै[20]र्विभूषिता ॥ ११ ॥
कपालं पट्टिशं वामे शूलं कर्त्री[21] च दक्षिणे ।
शवारूढा सुदुष्प्रेक्षा चामुण्डेयं प्रकीर्तिता ॥ १२ ॥
विनायको नराकारो बृहत्कुक्षिर्गजाननः[22] ।
त्रिनेत्रोऽथ बृहच्छुण्डो नागयज्ञोपवीतवान् ॥ १३ ॥
मुखं[23] सप्तकलं तस्य विस्तारेण सुरोत्तम ।
दैर्घ्येणाष्टकलं वक्त्रं शुण्डं[24] षट्त्रिंशदङ्गुलम् ॥ १४ ॥
कलाद्वादशबाहु[25]स्तु ग्रीवा सार्धकलोच्छ्रिता ।
पीनवक्षा गणेशस्तु उन्नतोरुः[26] प्रशस्यते ॥ १५ ॥
षट्त्रिंशदङ्गुलायामं कण्ठगुह्यान्तरं भवेत् ।
समं सुशोभनं तद्वद् द्व्यङ्गुला नाभिरिष्यते ॥ १६ ॥
ऊरू जङ्घे तथा पादे कर्तव्ये द्वादशाङ्गुले[27] ।
द्व्यङ्गुलं चोच्छ्रितौ पादौ द्वादशाङ्गुलमायतौ[28] ॥ १७ ॥

[11] ...संयुक्ता—B, C. [12] वराहस्य तु वाराहं बृहत्कण्ठा महोदया—B, C. [13] ... गदाधरा —B, C. [14] व्यवहित—B. [15] च—A. [16] ...संसक्ता—B, C. [17] भूषणा—B, C. [18] तु—C. [19] ऊर्ध्वकेशा दिगम्बरी—B; ऊर्ध्वकेशा कृशोदरी—C. [20] अस्तिखण्डविभूषिता— B. [21] शूलकर्णे—B, शूलकर्त्री—C. [22] रजाननः—B, C. [23] अथ—B, C. [24] मुण्डं —B. [25] ...नाम—B; ...नाहा तु—A, C, D. [26] तुन्दाभोगः—B, C. [27] कर्तव्या द्वादशाङ्गुलैः—B, C. [28] ...यामतौ—B, C.

सुदन्तं (ण्डं ?) दक्षिणे हस्ते परशुं च निवेशयेत् ।
लड्डुकैः पूर्णपात्रं तु उत्पलं वामतो न्यसेत् ॥ १८ ॥
सुमुखश्च विडालाक्षी पार्श्वद्वयव्यवस्थितौ ।
गणेशलक्षणं प्रोक्तं स्कन्दस्य प्रोच्यते[29]ऽधुना ॥ १९ ॥
मयूरवरमारूढो द्विभुजो बालरूपधृक्[30] ।
कुक्कुटं वामहस्ते तु शक्तिं दक्षिणतो न्यसेत् ॥ २० ॥
द्विभुजस्तु समाख्यात एकवक्त्रोऽग्निजस्त्वयम् [ढ] ।
षण्मुखः षड्भुजो वापि भुजैर्द्वादशभिस्तथा ॥ २१ ॥
स्थापितः[31] कार्तिकेयो वै दर्शनात् पापनाशनः ।
... . ॥ २२ ॥

॥ २७ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे सप्तविंशः मातृलक्षणपटलः ॥ २७ ॥

अष्टाविंशः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि लोकेशानां तु लक्षणम् ।
ऐरावतगजारूढो वज्रहस्तः सुराधिप ॥ १ ॥
द्विभुजो बहुनेत्रश्च सर्वाभरणभूषितः ।
सर्वलक्षणसंपूर्णः कार्यस्त्विन्द्रो नृपोपमः[ण] ॥ २ ॥
ज्वालामण्डलमध्यस्थः कुर्चालः श्मश्रुलस्तथा ।
योगपट्टासनोपेतो[1] ब्रह्मसूत्रविभूषितः ॥ ३ ॥
अधिस्थो[त] ऽथ द्विबाहुर्वै कार्यो[2] वह्निर्विलोहितः ।
दक्षिणे चाक्षसूत्रं तु कुण्डिकां[3] वामतो न्यसेत ॥ ४ ॥

[29] चोच्यते—B. [30] वाम—B [ब] शिरूपकः—E. [ढ] अग्निजस्तु यः—E. [31] स्थाप्यते—B, C. [ण] नृपोत्तम—E, F. [1] योगपट्टसमोपेतो—B, C. [त] अधिस्थो—Var, ed. [2] कार्या—B, C. [3] दण्डिकां—B, C.

पाश[4]दण्डायुधोपेतो[5] द्विभूजो महिषासनः ।
वैवस्वतः पीनकायो दिव्याभरणभूषितः ॥ ५ ॥
विरूपैः किंकरैर्युक्तो लक्षणैर्विविधैर्युतः[थ] ।
पार्श्वद्वयेऽस्य पुरुषौ कर्तव्यौ[6] भीषणाकृती ॥ ६ ॥
द्विबाहुः पीनदेहस्तु[7] खड्गहस्तोऽञ्जनप्रभः ।
विभूषितः सदा कार्य ऋक्ष[8]गोरक्षसां पतिः[9] ॥ ७ ॥
द्विबाहुः पाशहस्तस्तु मकरस्थो विभूषितः ।
कर्तव्यो वरुणो देवः कुण्डलाभ्यां विभूषितः ॥ ८ ॥
द्विबाहुर्ध्वजहस्तस्तु[द] मृगारूढः स्खलंकृतः[10] ।
सर्वाभरणसंयुक्तः कार्यो वायुः[11] सुरोत्तमः ॥ ९ ॥
सुपीनदेहो यक्षेशो[12] हारकेयूरभूषितः ।
सर्वलक्षणसंपूर्णो गदाशङ्खधरो[13]ऽनघः ॥ १० ॥
नानारत्नोज्ज्वलेनाथ मुकुटेन विभूषितः ।
कर्तव्यो वामनाकारो द्विभुजो नरवाहनः ॥ ११ ॥
वृषारूढश्चतुर्बाहुः शङ्खकुन्देन्दुसप्रभ[14] ।
कपालं वामहस्तेऽथ शूलं हस्तेऽथ[15] दक्षिणे ॥ १२ ॥
नागपाशं तथा वामे दक्षिणेन वरप्रदः ।
ईशानं कारयेद् देवं सर्वविद्येश्वरं प्रभुम् ॥ १३ ॥
अथवा सर्वलोकेशान् स्थितान् कुर्याद् विचक्षणः ।
यथोक्तलक्षणोपेतान् पद्मपीठस्थितान् बुधः ॥ १४ ॥
॥ २८ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे अष्टाविंशः लोकेशप्रतिमालक्षणपटलः ॥ २८ ॥

[4] पाद —A. [5] दण्डधरोपेतो—B, C. [थ] ...धरपि —E, F. [6] कर्तव्ये —B, C. [7] पीनबाहुश्च —A, B, F. [8] वक्ष्ये—B, C. [9] प्रति—B, C. [द] ...वज्रहस्तस्तु—A, B, C. [10] सुलक्षणः—B C. [11] कार्योऽवद्यः—B, C. [12] .. हयक्षेशो —A ; B, C. [13] शङ्खचक्रधरो —B, C. [14] ...सुप्रभः—B, C. [15] हस्ते तु—B, C.

ऊनत्रिंशः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि रुद्रमुर्तेस्तु लक्षणम्।
पद्मासनश्चतुर्बाहुर्नागयज्ञोपवीतवान्॥ १॥
व्याघ्रचर्मपरीधानो जटाखण्डेन्दुमण्डितः[1]।
कपालं कुण्डिका वामे त्रिशूलं दक्षिणे तथा॥ २॥
गलन्तिकां तथा दद्याद् दक्षिणे सुरसत्तम।
कुष्माण्डश्च[2] तथा भृङ्गी वामदक्षिणसंस्थितौ॥ ३॥
एवं तु कारयेद् रुद्रं सर्वलक्षणलक्षितम्।
त्रिशूलधृक् तथा वामे वरदो[3] दक्षिणेन तु॥ ४॥
द्विभुजोऽयं हरः साक्षात् सर्वकामफलप्रदः[4]।
अर्धनारीश्वरस्येह संक्षेपाल्लक्षणं शृणु॥ ५॥
हरार्धं दक्षिणं[5] प्रोक्तमुमार्धं वाममुच्यते।
शङ्करार्धं जटाबद्धमर्ध[6]चन्द्रविभूषितम्॥ ६॥
गौर्यर्धं सालकं[क] कार्यं[7] मौलिना भूषितं[8] शिरः।
शिवार्धे कुण्डलं कर्णे[9] उमार्धे बालिका[ख] भवेत्॥ ७॥
गौर्या भुजद्वये[10] कार्यं केयूरं कङ्कणं तथा।
कुण्डिकां कमलं चैव दद्याद् देव्या भुजद्वये॥ ८॥
अक्षसूत्रं त्रिशूलं च तदर्धं[11] हारमेव च।
उपवीतं हरार्धे च[12] ऊर्ध्वलिङ्गं व्यवस्थितम्॥ ९॥
व्याघ्रचर्म तथा कट्यां सर्पमेखलसंयुतम्।
दिव्यवस्त्रसमोपेतं गौर्यर्धं[13] मेखलायुतम्॥ १०॥

[1] जटामुण्डेन्दु—B, C. जटाखण्डेन्दु भूषितः—E, F. [2] कुष्माण्डश्च—B, C. [3] वरदे—B. [4] ...प्रदम्—A. [5] दक्षिणे—B, C. [6] अर्ध—B, C. [क] बालकं—Var. ed. E, F. [7] कार्या—B, C. [8] मौलिविभूषितं—B, C. [9] कुण्डलकर्णे—B, C. [ख] बालिकं—E. [10] भुजद्वयं—A, D, E [11] स्तनपोन्नतं वामे तदर्धं=A, D, E, F; .. तदूर्ध्वं—B. C. [12] तु—B, C. [13] गौर्यांङ्गे—B, C.

शिवस्य दक्षिणः पादः पद्मोपरि व्यवस्थितः ।
किञ्चिदभ्युन्नतो वामे नायिका भूषिताङ्गुलिः ॥ ११ ॥
सालक्तकं च कर्तव्यो[14] नूपुरेण विभूषितः[15] ।
अर्धनारीश्वरः प्रोक्त उमेशं शृणु सत्तम ॥ १२ ॥
सर्वलक्षणसंपूर्णो[16] द्विभुजोऽथ त्रिलोचनः ।
व्याघ्रचर्मपरीधानो जटाखण्डेन्दुभूषितः ॥ १३ ॥
चित्राम्बरधरा गौरी[17] द्विभुजालंकृता शुभा ।
अर्धचन्द्रासनेनाथ उपविष्टो हरः स्मृतः ॥ १४ ॥
सव्योरुसंस्थिता गौरी शङ्करेणाऽवगूहिता[18] ।
हरस्य दक्षिणे हस्ते दद्यादिन्दीवरं शुभम् ॥ १५ ॥
मध्यस्कन्धे शिवस्येह[19] हस्तं गौर्यास्तु दक्षिणम् ।
आदर्शं च तथा वामे ह्युमेशौ कीर्तितौ मया ॥ १६ ॥
अष्टादशभुजं कुर्याद् भैरवं दैत्यमर्दनम् ।
नानाभरणसंयुक्तं नानायुधधरं विभुम् ॥ १७ ॥
मुण्डमालाधरं देवं व्यादितास्यं[20] सुशोभनम् ।
लेलिहानमहाजिह्वं[21] तीक्ष्णदंष्ट्रोग्रलोचनम्[22] ॥ १८ ॥
प्रमथैर्यातुधानैश्च[23] मातृभिः परिवारितम् ।
श्मशानारण्यदेशे तु स्थापयेद् भैरवं हरम् ॥ १९ ॥
लक्षणं तस्य वक्ष्यामि तन्निबोध सुरत्तम ।
मुखमष्टकलं[24] कार्यं विवृतास्यं सुभीषणम्[25] ॥ २० ॥
प्रसृतं नयनं[26] कार्यं शिरोमुण्डेन्दुभूषितम् ।
कथितं भैरवेशस्य वक्त्रोदेशो[27]ऽधिको गतः[28] ॥ २१ ॥

[14] कर्तव्ये—A. [15] विभूषिता—A. [16] .. संयुक्तो—B, C. [17] देवी—B, C. [18] शङ्खावलागृहीताः—A. ...नाथ गूहिता—E, F. [19] शिवस्यैव—B, C. [20] व्यादितास्य—B. [21] महा—omitted in A. [22] तीक्ष्णदीप्तोग्रलोचनम्—A, E. F. [23] This verse is partially omitted in B. [24] अष्टाङ्गुलं—B, C. [25] सुशोभनम्—B, C. [26] प्रभूतनयनं—B, C. [27] .. देशा—B. [28] मया—C.

नेत्रत्रयाधिकं वक्त्रः कटिः पञ्चकलाधिका[ग] ।
त्रि[29]नेत्राद्यधिका चोरू जानुपाणिः कलाधिका (?) ॥ २२ ॥
जङ्घे सार्धकलं वृद्धे[30] तद्विभागेन वाग्रतः[31] ।
किञ्चिदूर्ध्वौ[32] तथा पादौ बाहुमूले कलाधिकौ ॥ २३ ॥
उपबाहोस्तु पर्यन्तं यावद्धीनतरं[33] क्रमात् ।
सुभीषणे तथा वक्त्रे दंष्ट्रेऽङ्गुलविनिर्गते ॥ २४ ॥
त्रिशूलाग्रेण संविध्य प्रक्षिप्तसुमहासुरः[घ] ।
धनुःकृपाणखट्वाङ्गशक्तिकङ्कालपाशधृक् ॥ २५ ॥
शरखेटकहस्ते तु कर्तृकामुद्गरायुधः ।
वराभयप्रदश्चापि गदापरशुधृक् तथा ॥ २६ ॥
कपालमुण्डधारी च नागयज्ञोपवीतवान् ।
व्याघ्रचर्मपरिधानः शस्यते भैरवेश्वरः ॥ २७ ॥
एकवक्त्रोऽयमाख्यातः पञ्चवक्त्रोऽथवा भवेत् ।
कर्तव्यो भैरवस्त्वेवं सर्वकामफलप्रदः ॥ २८ ॥
॥ २६ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे ऊनत्रिंशः रुद्ररूप[34]प्रतिमालक्षणपटलः ॥ २६ ॥

त्रिंशः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि गौर्या लक्षणमुत्तमम् ।
द्विभुजा वाम्बिका त्रयक्षा सिंहारूढा सुभूषिता ॥ १ ॥
त्रिशूलं दक्षिणे हस्ते वामहस्ते तु दर्पणम् ।
चतुर्भुजा वा पद्मस्था त्रिशूलवरधारिणी ॥ २ ॥

[ग] कलाधिकः—F. [29] द्विनेत्र—B. [30] वृक्षे—A. [31] वायुतः—C. [32] किञ्चिद्बद्धो—A.
[33] यावद् ज्ञानतरं—B, C. [घ] प्रक्षितव्य महासुरः—E, F. [34] रूप—found in B only.

गलन्ती[1]-कुण्डिकाहस्ता दक्षिणं वरदं करम् ।
एवं द्विधा ते[2] कथिता,[3] अम्बिकेयं सुरेश्वरी ॥ ३ ॥
ललितापि च कर्तव्या गणेशगृहसंस्थिता[क] ।
चतुर्भुजा च पद्मस्था शोभना[4]दर्शधारिणी ॥ ४ ॥
भुजस्तस्याश्च[5] कर्तव्यो वामः स्कन्दशिरोगतः[6] ।
श्रीफलं दक्षिणे देयं नानाभरणभूषिता[7] ॥ ५ ॥
चण्डिकालक्षणं वक्ष्ये तन्मे निगदतः शृणु ।
कार्या दशभुजा देवी चण्डिकाष्टभुजाथवा ॥ ६ ॥
शूलं खड्गं तथा चक्रं शक्तिं चेषुं च[8] दक्षिणे ।
नागपाशं तथा चर्म परशुं चाङ्कुशं तथा ॥ ७ ॥
वामहस्तेषु[ख] दातव्यं धनुश्चा[9]कर्णपूरितम् ।
सिंहारूढा तथा देवी सर्वलोकेश्वरेश्वरी[10] ॥ ८ ॥
महिषश्च तथा कार्यो भगवत्यग्रतः[11] स्थितः ।
अवज्ञया तु[12] दैत्येन्द्रं देवी हन्तुं समुद्यता ॥ ९ ॥
त्रिशूलेन हतो गौर्या नागपाशेन पाशितः[13] ।
अधस्तान्महिषस्येह शिरश्छेद[14]समुत्थितः ॥ १० ॥
मायावी महिषो दैत्यः संक्रुद्धो दंशिताधरः ।
सिंहस्थं दक्षिणं पादं वामं[15] महिषपृष्ठगम् ॥ ११ ॥
उत्क्रान्त्या रुधिरं दैत्यं वमन्तं संप्रदर्शयेत् ।
एवं लक्षणसंयुक्ता चण्डिका संप्रकीर्तिता ॥ १२ ॥

[1] शलन्ती—B, C. [2] विधात्रे—B; विधा ते—C. [3] कथिता—omitted in B. [क] गणेशहस्तसंस्थिता—E, F. [4] दशनादर्श—A. [5] ..स्याद्य—B. [6] वामस्कन्ध—A. वामस्कन्द—E, F. [7] ...भूषिताम्—B, C. [8] तु—A. [ख] वामहस्तेऽथ—D. [9] धनुश्च कर्ण—A. [10] ...रेश्वरम्—A. [11] सम्भवत्यग्रतः—A. [12] च—B.; अवज्ञातं च—A, C. [13] पालितः—B, C. [14] शिरश्छेदं—B, C.; ...समन्वितः—A, B, C. [15] वाम—B.

....

तयोर्गौर्यादिभेदेन कार्या सानेकधा पुनः ॥ १३ ॥
॥ ३० ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे त्रिंशः गौरीप्रतिमालक्षणपटलः ॥ ३० ॥

एकत्रिंशः पटलः

श्रीभगवान् उवाच—

लिङ्गस्य लक्षणं वक्ष्ये तन्मे निगदतः[1]शृणु ।
दैर्घ्यार्धमष्टभिर्भक्त्वा[2] त्यक्त्वा भागत्रयं ततः ॥ १ ॥
विष्कम्भं भुक्त[3]भागैस्तु चतुरस्रं तु कारयेत् ।
आयाममूर्तिभिर्भक्त्वा एकद्वित्रिक्रमान्नयेत् ॥ २ ॥
ब्रह्मविष्णुशिवाङ्गेषु वर्धमानोऽयमुच्यते ।
चतुरस्रेऽस्य[4] कर्णार्धं गृह्य कोणेषु नाञ्जयेत्[5] ॥ ३ ॥
अष्टाग्रं वैष्णवं भागं सिध्यत्येव न संशयः ।
षोडशास्रं ततः कुर्याद् द्वात्रिंशास्रं ततः पुनः ॥ ४ ॥
चतुःषष्ट्यस्रकं[a] कृत्वा वर्तनं*साधयेत् ततः ।
वर्तयेदथ लिङ्गस्य शिरो वै देशिकोत्तमः ॥ ५ ॥
विस्तारमस्य लिङ्गस्य अष्टधा संविभाजयेत्[6] ।
भागार्धार्धं तु संत्यज्य[7] चक्राकारं[8] शिरो भवेत् ॥ ६ ॥
त्रिषु भागेषु सदृशम् आयामपदविस्तरम्[क] ।
तद्विभागसमं लिङ्गं सर्वकामफलप्रदम् ॥ ७ ॥

[1] निगदितः –B, C. [2] ..वङ्गभित्यक्त्वा—A ; ...मम्बुभिर्भक्त्या अक्त्वा—Var. ed. [3] भुक्त=A ; B, C. omit this word ; भूत—E. [4] ...यस्य—B, C. चतुरस्रस्य—F, [5] कोणेषु प्रोज्झयेत्—B, C. ; केशेषु—A. (a) चतुःषष्ट्यंशकं—E, F. *वर्धनं—E, F. [6] सन्निभाजयेत्—B, C. [7] संत्यक्त्वा—A, D, E. [8] चन्द्राकारं—B, C. क अपोशयञ्च विस्तरम् —D. F. सदृशायापाशयञ्च—E.

दैर्घ्यं तस्य चतुर्थेन विष्कम्भं[b] देवपूजिते ।
सर्वेषामेव लिङ्गानां लक्षणं शृणु साम्प्रतम् ॥ ८ ॥
मध्यसूत्रं[9] समास्फाल्य ब्रह्मरूढान्तिकं बुधः ।
षोडशांशस्तु लिङ्गस्य षड्भागैर्भाजितो यदा ॥ ९ ॥
तदा अमूल[10]सूत्राभ्यां (?) मानिमन्तर[11]मुच्यते ।
यवाष्टमुत्तमे कार्य[12] शेषाणां यवहानितः ॥ १० ॥
अर्चा[13]भागं त्रिधा कृत्वा ऊर्ध्वमेकं परित्यजेत् ।
अष्टधा तत् त्रयं[14] कृत्वा ऊर्ध्वभागत्रयं त्यजेत्[15] ॥ ११ ॥
ऊर्ध्वं तु पञ्चमाद् भागाद् ग्राम्यलेखां प्रलम्बयेत्[16] ।
भागमेकं परित्यज्य सङ्गमं कारयेत् तयोः ॥ १२ ॥
एतत् साधारणं प्रोक्तं लिङ्गानां लक्षणं मया[17] ।
सर्वसाधारणं वक्ष्ये पिण्डिकां तां निबोध मे[18] ॥ १३ ॥
ब्रह्मभागप्रवेशं* च ज्ञात्वा लिङ्गस्य चोच्छ्रयम् ।
न्यसेद् ब्रह्मशिलां विद्वान् सम्यक् कर्म शिलोपरि[ख] ॥ १४ ॥
तथा समुच्छ्रयं ज्ञात्वा पिण्डिकायां विभाजयेत् ।
द्वि[19]भागमुच्छ्रितं गीतं[c] विस्तारं लिङ्गसम्मितम्[d] ॥ १५ ॥
द्विभागमन्ततः[20] खातं कृत्वा पीठं विभाजयेत् ।
स्वमानार्ध[21]* विभागेन बाहुल्यं परिकल्पयेत् ॥ १६ ॥
बाहुल्यस्य त्रिभागेन[e] मेखलामथ कल्पयेत् ।
खातं[22] स्यान् मेखलातुल्यं[23] क्रमान्निर्यं (म्नं ?) तु कारयेत् ॥ १७ ॥

(b) बिम्बस्थं—F. [9] मध्यं सूत्रं—B, C. [10] तदा स—A ; तद्वैय—B, C. ; तदाप्यशूल—F. ; तदास्य शृणु सूत्राभ्यां—E. [11] मानिकान्तर—E. This line is partially omitted in B, C. [12] ...त्तमैः कार्यं—B, C. [13] आर्य—B, C. ; अष्टा—E. [14] अष्टधात्रद्वयं—B, C. [15] यजेत्—B. [16] पुनस्त्रयेत्—B, C. ; ऊर्ध्वं तु पञ्चमात्रास्य लेखाप्रणमयेत्—E, F. [17] लक्षणानू मया—B, C. [18] निबोधय—B, C. *...प्रबोधं—E, F. ख शिरोपरि—F. [19] त्रि—B, C. [20] त्रिभागमध्यतः—B, C. त्रिभागमन्ततः—A, D. (c) पीतं—A, B, C, D. (d) संस्थितं—E. [21] प्रमाणार्धं—A, D, E, F. (e) विभागेन—A, B, D. [22] ख्यातं—B, C. [23] तुल्य—B, C.

मेखलापोडशांशेन खातं वा तत्प्रमाणतः।
उच्छ्रायं यत् तु पीठस्य विकारांश्च तु कारयेत्॥ १८॥
भूमौ प्रविष्टमेकं तु भागैकैकेन यष्टिका[24]।
कण्ठं भागैस्त्रिभिः कार्यं भागैकेन च पट्टिका[25]॥ १९॥
द्वयंशेन चार्धयष्टिं[26] तु एकांशांशेति यष्टिका[27]।
भागं भागं प्रविष्टं तु यावत् कण्ठं[28] ततः पुनः॥ २०॥
निर्गमं भागमेकं तु यावद् वै कायय्ष्टिका[29]।
प्रणालस्य[30] त्रिभागेन निर्गमस्तु त्रिभागतः॥ २१॥
मूले तुल्यप्रविष्टारमग्रे द्वयंशेन चार्धतः।
कथं निम्नस्तु कुर्वीत खातं[ग] तच्चोत्तरेण वै॥ २२॥
....
पिण्डिकासहितं लिङ्गमेतत् साधारणं स्मृतम्॥ २३॥
॥ ३१॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे एकत्रिंशः लिङ्गलक्षणपटलः॥ ३१॥

द्वात्रिंशः पटलः

श्रीभगवान् उवाच—

अतःपरं[1] प्रवक्ष्यामि प्रतिमानां तु पिण्डिकाम्।
दैर्घ्येण प्रतिमातुल्या[2] तदर्धेन तु विस्तृता॥ १॥

[24] भोगेकेन च पट्टिका—B, C. [25] भागैकैकेन पट्टिका—A; भागैकैकेन यष्टिका—D. E, F. [26]...पट्टिं—B, C. [27] एकांशा शेषयट्टिका—B, C. [28] याचकं तु—A. यावत् कर्णं—E. [29] कायपट्टिका—B, C. [30] प्राणालस्य—B, C. [ग] तच्च—D. [1] C. omits परं। [2] ..तुल्य—B.

उच्छ्रितायामतोऽर्धेन[3] सुविस्तारार्धभागतः ।
त्रिभागेन तु बाहुल्यं* त्रिभागेन तु मेखला ॥ २ ॥
खातं तु[4] तत्-प्रमाणं तु किञ्चिदुत्तरतोन्नतम् ।
विस्तारस्य चतुर्थेन प्रमाणस्य विनिर्गमः ॥ ३ ॥
समं मूलस्य विस्तारमग्रे कुर्यात् तदर्धतः ।[a]
विस्तारस्य तृतीयेन तोयमार्गं तु कारयेत् ॥ ४ ॥
पिण्डिकार्धेन वा तुल्यं[b] दैर्घ्यं कुशस्य[क] कीर्तितम् ।
कुशं वा तुल्यदैर्घ्यं[5] च कृत्वा[6] सूत्रं च कारयेत[7] ॥ ५ ॥
उच्छ्रायं पूर्ववत् कुर्याद् भागषोडशसंख्यया[ख] ।
अधस्तस्य द्विभागं तु[8] कण्ठं कुर्यात् त्रिभागकम्[9] ॥ ६ ॥
शेषा ह्यो[10]कैकशः कार्याः प्रतिष्ठा[11] निर्गतास्तथा ।
यष्ट्रिका[12] पिण्डिका चेयं सामान्यप्रतिमासु च ॥ ७ ॥
प्रासादद्वारमानेन प्रतिमाद्वार[13]मुच्यते ।
गजव्यालकसंयुक्ता प्रभास्याः प्रतिमासु च ॥ ८ ॥
पिण्डिकासु यथाशोभं कर्तव्या सततं हरेः ।
सर्वेषामेव देवानां विष्णूक्तं मानमुच्यते[14] ॥ ९ ॥
देवीनामपि सर्वासां लक्ष्म्युक्तं मानमुच्यते ।
किंकराद्याश्च कर्तव्याः सप्तसंस्थान[15]संयुताः ॥ १० ॥
अर्धोत्थितविधाना[16] च बाहुल्यान्तास्तथा तथा ।
तथा तथोपसंलक्ष्य कुर्याद् देशिकसत्तमः ॥ ११ ॥

[3] ...र्धेन—A, B, C. * वा तुल्यं—A, B, C. [4] B, C. partially omit this line ; ... च—D, F. (a) E replaces this line by repeating 2b. (b) बाहुल्यं—E. क देशस्य—B, C. [5] तुल्याद् दैर्घ्यं—B,D. ; बाहुल्यदैर्घ्यं—F. ; कुशबाहुल्याद् दैर्घ्यं च—E. [6] ज्ञात्वा—A, D, F. [7] सूत्रं प्रकल्पयेत्—A, D, F. ख भागशेषेण संख्यया—D F. [8] अधः पट्टं विभागं तु—B, C. [9] त्रिभागिकम्—C, D. [10] ...स्त्वेकैकशः—C. [11] प्रयिष्ठा—B, C. [12] पट्टिका—B, C. [13] द्रव्य—A, D. [14] Verses 8 and 9 are omitted in B, C. [15] सप्तवाताल —B ; सप्तषट्ताल —C. [16] अर्धोत्थितविधाने—B, C.

अव्यक्तस्थापनं[17] नेष्टं[18] व्यक्तायामेक[19]मण्डले (?)।
लौहजः शैलजो[20] दोष एकमूर्तौ न विद्यते ॥ १२ ॥
॥ ३२ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे द्वात्रिंशः पिण्डिकालक्षणपटलः ॥ ३२ ॥

त्रयस्त्रिंशः पटलः

श्रीभगवान् उवाच—

प्रतिष्ठापञ्चकं वक्ष्ये तन्निबोध चतुर्मुख।
परमात्मा हरिर्देवस्तच्छक्तिः श्रीरिहोदिता ॥ १ ॥
श्रीदेवी प्रकृतिः प्रोक्ता केशवः पुरुषः स्मृतः।
न विष्णुना विना देवी न हरिः पद्मया[क] विना ॥ २ ॥
अर्चा[1]मूर्तिः स्मृतः कृष्णः पिण्डिका कमलालया।
तयोर्यो विधिना योगः सा प्रतिष्ठा प्रकीर्तिता ॥ ३ ॥
....
इच्छाफलार्थिभिस्तस्मात् प्रतिष्ठा क्रियते नरैः ॥ ४ ॥
आचार्यः पूर्वमेवोक्तो मूर्तिपाश्च मया तव।
येन तन्त्रेण[2] प्रारब्धा प्रतिष्ठा गुरुणा भवेत् ॥ ५ ॥
तन्मन्त्र[3]पारगाः शस्ता मूर्तिपाश्छिन्नसंशयाः।
षडङ्गविदुषः सर्वे मन्त्रब्राह्मणपारगाः ॥ ६ ॥
एवंविधैर्वैष्णवैस्तु प्रतिष्ठामारभेद् गुरुः।
उत्तराशां श्रिते[4] भानौ शुक्लपक्षे सुरेश्वर ॥ ७ ॥

[17] . स्थापनी—B, C. [18] नष्टं—C. [19] व्यक्तं वा मेक—B, C.; व्यक्तायामेव—F. [20] शिलजो—B. [क] पद्मजां—D. [1] अर्च्या—A. [2] मन्त्रेन—B. [3] तत्तन्त्र—A, F. [4] उत्तराशाश्रिते—B, C.; ...स्थिते—A.

कृष्णपक्षान्तिमत्र्यंशाहते सुरगणार्चित[5]।
शुक्लस्याद्यं परित्यज्य प्रतिष्ठां कारयेद् बुधः ॥ ८ ॥
माघे वा फाल्गुने वापि[ख] चैत्रवैशाखयोरपि।
ज्यैष्ठे मास्यथवाषाढे सुयोगकरणान्विते[6] ॥ ९ ॥
प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा।
सप्तमी दशमी चैव द्वादशी च त्रयोदशी ॥ १० ॥
अष्टमी पौर्णमासी च प्रतिष्ठायां सुशोभनाः।
गुरुः सोमो बुधः शुक्रः प्रतिष्ठायां शुभावहाः[7] ॥ ११ ॥
मेषो वृषोऽथ मिथुनः कर्कटो वृश्चिकस्तथा।
सिंहः कन्या च सततं विज्ञेयाः शान्तिकारकाः ॥ १२ ॥
उत्तरासु तथा मूले रौद्रे पुष्येऽथ[8] शस्यते।
वैष्णवे चानुराधे च रेवत्यां रोहिणीषु च ॥ १३ ॥
अश्विन्यामथ चित्रायां भरण्यां च पुनर्वसौ।
प्रतिष्ठां कारयेद् विद्वान् नक्षत्रे मृगशीर्षके ॥ १४ ॥
अयने विषुवे चैव षडशीतिमुखे तथा।
मित्रं परममित्रं च सम्पत् क्षेमं च साधकम् ॥ १५ ॥
तारापञ्चकमेतच्च प्रतिष्ठायां प्रशस्यते।
[चतुर्थे द्वादशे चन्द्रे चाष्टमे च विशेषतः।
प्रतिष्ठास्थापनायां च मरणं वै विनिर्दिशेत् ॥]
गरं विष्टिं सकिन्तुघ्नं (?) शकुनं सचतुष्पदम्[9] ॥ १६ ॥
वर्जयेत् सर्वयत्नेन[ग] प्रतिष्ठायां सुरेश्वर।
विष्कम्भम् अतिगण्डं च शूलं परिघमेव च ॥ १७ ॥

[5] .. नार्चिते—B, C. [ख] माघे मासि फाल्गुने वा—A, B. [6] शुभयोगकरान्विते—B, C. [7] शुभावहः—B, C. [8] पुष्ये च—B, C. [Found in E only.] [9] शकुनिं च चतुष्पदम्—B, C. [ग] सप्रयत्नेन—D.

गण्डं व्याघातकं चैव वैधृतिं वज्रमेव च ।
व्यतीपातं हर्षणं च योगान् एतान् विवर्जयेत्* ॥ १८ ॥
न शस्तं सग्रहे[10] नित्यं तथा वै दक्षिणायने ।
लग्ने तु सुस्थिरे कार्यं स्थिरांशे सुरसत्तम ॥ १९ ॥
कर्तुश्चोपचयोपेते मुहूर्ते शोभने[11] द्विज ।
मैत्रे (वै ?) विराजे सावित्रे श्वेते वा वासवे शिवे[12] ॥ २० ॥
अभिजिद्रोहिणीनां च मुहूर्ते पद्मसम्भव[13] ।
गान्धर्वे[14] वा स्थापयीत हरिं सुरगणार्चितम् ॥ २१ ॥
आदित्यस्य बलं लब्ध्वा लग्नं शुभनिरीक्षितम्[15] ।
चन्द्रतारावलं प्राप्य स्थापयेत् पुरुषोत्तमम् ॥ २२ ॥
....
सुग्रहे च सुनक्षत्रे[16] कुर्यात् तत्राधिवासनम्[17] ॥ २३ ॥
॥ ३३ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे त्रयस्त्रिंशः कालपरीक्षापटलः ॥ ३३ ॥

चतुस्त्रिंशः पटलः

श्रीभगवान् उवाच—

प्रासादं वेष्टयित्वा तु कुर्याद् गुप्ततरं बुधः ।
कृत्वा गुप्तं ततः पश्चाद् यागमण्डपमारभेत ॥ १ ॥

*With the names of the 'yogas' D adds the following numerical indications: विष्कम्भम्—१; शूलम्—९; परिघम्—१९; गण्डम्—१०; अतिगण्डम्—६. व्याघातकम्—१३; वैधृतिम्—८; वज्रम्—१५; व्यतिपातम्—१७; हर्षणम्—१४ [10] सग्रहो —C. [11] गोतमे—B. [12] शवे—C. [13] पद्मसम्भवे—B, C. [14] गन्धर्वे—A. [15] लग्ने शुभनिरीक्षिते—B. [16] स्वग्रहे च स्वनक्षत्रे—A. [17] कुर्यात् तु वाधिवासनम्—A.

गर्भसूत्रं तु निःसार्य[क] प्रासादस्याग्रतो गुरुः ।
कृत्वा भूमिं तु निशल्यां[ख] मण्डपं सूत्रयेत् ततः ॥ २ ॥
हीनस्तु मण्डपः कार्यो हीने त्वायतने सदा ।
उत्तमेषूत्तमः कार्यो मध्यमे मध्यमस्तथा ॥ ३ ॥
दशाष्टहस्तं हीनं तु मध्यं द्वादशषोडशम् ।
विंशहस्तं चतुर्विंशमुत्तमस्योत्तमं द्विज ॥ ४ ॥
चतुर्हस्तादिमानानां प्रासादानां यथाक्रमम् ।
मण्डपानष्टहस्तादि कल्पयेद् वेदवृद्धितः[ग] ॥ ५ ॥
समवृत्तं[1] चतुर्द्वारं चतुस्तोरणभूषितम् ।
विचित्रस्तम्भविन्यासं रचनारचितं[2] शुभम् ॥ ६ ॥
धूमनिर्गमनोपेतं[3] मण्डपं कारयेद् बुधः ।
स्नानार्थं कलसार्थं च स्नान[4]द्रव्यार्थमेव च ॥ ७ ॥
जलनिर्गमनोपेतमर्धेन स्नानमण्डपम् ।
ऐशान्यां कलसार्थं च[5] तस्माद् दक्षिणगोचरे ॥ ८ ॥
पूर्वस्यां मण्डपं कुर्याद्[6] यागद्रव्यार्थमायतम् ।
त्रि[7]भागेनाथवार्धेन कुर्याद् वेदीं सुशोभनाम् ॥ ९ ॥
....
हस्तमात्रोच्छ्रिता कार्या मध्ये सम्यग्व्यवस्थिता ॥ १० ॥
मण्डपं मण्डयेदार्द्रशाखाभिस्तु समन्ततः ।
विमलेन वितानेन पताकाभिश्च भूषयेत् ॥ ११ ॥
दर्पणैश्चामरैर्घण्टैः स्तम्भान् वस्त्रैर्विभूषयेत् ।
कलसैर्घटिकाभिश्च साधारैर्गेडुकैस्तथा[घ] ॥ १२ ॥

[क] निःसिर्य—Var. ed. निःशार्य—E. [ख] निःसिर्य—Var. ed. [1] समसूत्रं—B, C. [ग] ...बुद्धितः—F.; बद्धितः—E. [2] विन्यासरचताचरितं—B, C. ...वर्तितं—F. [3] धूमस्य निर्गमोपेतां—B, C. [4] योग—B, C. [5] तु—C. [6] कार्यं—C. [7] वि—B. [घ] साधारैः कुण्डकैस्तथा—E, F.

मण्डपं भूषयित्वैवं जाह्नवीवालुकां शुभाम् ।
बाह्यदेशेषु विकिरेत् पञ्चगव्येन प्रोक्षयेत् ॥ १३ ॥
पाषण्डान् नास्तिकान् सर्वान् देवब्राह्मणदूषकान् ।
दीक्षाबहिष्कृतान् सर्वान् हेतुवादरतांस्तथा ॥ १४ ॥
निवार्य प्रारभेत् कर्म वैष्णवैर्दीक्षितैः सह ।
आहृत्य सर्वद्रव्याणि स्रुक्स्रुवौ[8] विष्टराणि च ॥ १५ ॥

....

यज्ञपात्राणि सर्वाणि स्थाप्य यत्नेन देशिकः ॥ १६ ॥
श्वेतवस्त्रपरीधानः सोष्णीषश्चन्दनोक्षितः ।
अङ्गुरीयकहस्तश्च[9] सर्वालंकारभूषितः ॥ १७ ॥
आत्मानं विष्णुवत् पूज्य गन्धपुष्पादिभिर्गुरुः ।
ध्यात्वा देहं[10] विष्णुरूपं मन्त्रात्मकं ततः शुचिः[11] ॥ १८ ॥
हरिं प्रणम्य विज्ञाप्य मूर्तिपानपि पूजयेत् ।
सितैः पुष्पैर्वस्त्रयुग्मैरङ्गुरीयैरथाङ्गदैः ॥ १९ ॥
निपुणैः शिल्पिभिः सार्धं ततः कर्म समाचरेत्[12] ।
गव्येन सत्कृत्य शोध्य कुम्भान्[13] विचक्षणाः[ङ] ॥ २० ॥

....

स्थापयेन्मूर्तिपान् पश्चात् कुण्डे कुण्डे तु देशिकः ॥ २१ ॥
चतुष्कोणं भवेत् कुण्डं पूर्वस्यां दिशि सर्वदा ।
अर्धचन्द्रं भवेद् याम्यां वारुण्यां वर्तुलं भवेत् ॥ २२ ॥
[पद्माभमुत्तरे भागे कुण्डं स्याद् द्विजसत्तम ।
अश्वत्थोडुम्बरं चैव[14] न्यग्रोधः प्लक्ष एव च[15] ॥ २३ ॥

[8] श्रुक्श्रुवौ—A, B.; श्रुक्श्रुवं—C, D.; सुरक्षक्—F. [9] साङ्गुरीयक—B, C. [10] देवं—A, D. [11] शुचिं ततः—C. [12] समारभेत्—B, C. [13] कुण्डान्—B, C. [ङ] विचक्षणैः—E. [14] अश्वत्थोदुम्बरौ चैव—B, C. [15] प्लक्षमेव च—C. [Verses 23-24 omitted in E, F.]

तोरणार्थं तु कथिता पूर्वादिषु यथाक्रमम् ।
सुशोभनं भवेत् पूर्वे सुभद्रं दक्षिणे भवेत् ॥ २४ ॥]
सुकर्मा पश्चिमे भागे सुहोत्रं तु तथोत्तरे ।
.... ॥ २५ ॥
एकहस्तं खनेद् भूमौ चतुर्हस्तं तथोच्छ्रयेत् ।
द्विहस्तान्तरमन्योन्यं तोरणं संप्रकल्पयेत् ॥ २६ ॥
तिर्यक्फलकमानं स्यात् स्तम्भानामर्धमानतः ।
"स्योना पृथिवि[16]" मन्त्रेण स्थाप्याः पूज्याश्च[17] तोरणाः ॥ २७ ॥
शुक्लवस्त्रयुगच्छन्नान् दर्भपिञ्जलसंयुतान्[च] ।
पुष्पमालापरिक्षिप्तांस्तोरणान् परिकल्पयेत् ॥ २८ ॥
वृत्तं वा चतुरस्रं वा द्विषट्काष्टाङ्गुलं तु वा ।
षट्चतुर्वाङ्गुलं कार्यं[18] तोरणं निर्व्रणं समम् ॥ २९ ॥
तोरणस्तम्भमूलेषु कलसान् मङ्गलाङ्कुरान् ।
प्रदद्यादुपरिष्टात् तु[19] कुर्याच्चक्रं सुदर्शनम् ॥ ३० ॥
कलसं वर्धमानं[20] वा वसुभागेन कल्पयेत् ।
पञ्चहस्तप्रमाणं तु ध्वजं कुर्याद् विचक्षणः ॥ ३१ ॥
वैपुल्यं[छ] चास्य कुर्वीत षोडशाङ्गुल[ज]-सम्मितम् ।
सप्तहस्तोच्छ्रितं चास्य कुर्याद् दण्डं सुरोत्तम ॥ ३२ ॥
सप्तहस्तास्ततो दैर्घ्याद्[21] विस्तारात् द्वादशाङ्गुलाः ।
द्विपञ्चहस्तदण्डेषु पताकास्तु निवेशयेत् ॥ ३३ ॥
बाह्यदेशे मण्डपस्य तोरणाभ्यन्तरे तथा ।
अष्टौ ध्वजाः स्थापनीयाः पूर्वादिक्रमयोगतः ॥ ३४ ॥

[16] श्यो ना पृथिवि—B, C.; श्यो ना पृथिवी—F. [17] पूज्यास्तु—A, D, F. [च] दर्भञ्जलपिसंयुतान्—Var. ed. [18] षट्चतुरङ्गुलं कुर्यात्—B, C. [19] च—B, C. [20] मूर्ध्वमानं वा—B, C. [छ] विस्तारं—E, F. [ज] द्वादशाङ्गुल—D. [21] सप्तहस्ताः ध्वजाः कार्याः—B; सप्तहस्तो ध्वजा कार्या—C.

अरुणोऽग्निनिभश्चैव कृष्णः शुक्लोऽथ पीतकः ।
रक्तवर्णस्तथा श्वेतः सर्ववर्णास्तथैव च ॥ ३५ ॥
कुमुदः कुमुदाक्षश्च[22] पुण्डरीकोऽथ[23] वामनः ।
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥ ३६ ॥
इत्येते विष्णुलोकस्य दिक्पालगणनायकाः ।
कोटिसंख्यगुणैर्युक्ताः पूजनीया यथादिशि ॥ ३७ ॥
नवेन चित्रवर्णेन वितानं कारयेच्छुभम् ।
अथवा शुक्लवर्णेन मध्ये जलजभूषितम् ॥ ३८ ॥
उत्तमाधममध्यं तु प्रमाणं चास्य कीर्त्यते ।
मण्डपस्य प्रमाणं तु ज्येष्ठं तत् स्याद् वितानकम् ॥ ३९ ॥
मध्यमं वेदिकामात्रं कनिष्ठं मण्डलस्य तु[24] ।
.... ॥ ४० ॥
शातकुम्भमयान् कुर्याद् राजतान् शुल्वजानथ ।
जलाढकप्रपूरांस्तु लोहजान् कारयेद् दृढान् ॥ ४१ ॥
मृन्मयान् कलसान् वापि पक्वबिम्बोपमान् शुभान् ।
अष्टाविंशाधिकशतपल[25]पूरांस्तु मृन्मयान् ॥ ४२ ॥
अवक्रान् स्फोटरहितान् कालमण्डलवर्जितान् ।
आहृत्य कलसान् वस्त्रपूततोयेन पूरयेत् ॥ ४३ ॥
सहिरण्यान् वस्त्रयुग्मबद्धकण्ठान् निवेशयेत् ।
तोरणानां[26] बहिः स्थाप्याः प्रागादिषु यथाक्रमम् ॥ ४४ ॥
वेदिकायाश्चतुष्कोणे चतुरः कलसान् न्यसेत् ।
"आजिघ्र" इति मन्त्रेण कलसान् स्थापयेद् बुधः ॥ ४५ ॥
इन्द्रादिलोकपालांस्तु कलसेषु यथाक्रमम्[27] ।
पूजयेद् गन्धपुष्पाद्यैर्मन्त्रैरावाह्य देशिकः[28] ॥ ४६ ॥

[22] कुमुदाख्यश्च—A. [23] पुण्डरीकश्च—C. [24] च—B, C. [25] ...शतान् जल—C. [26] तोरणाश्च—A. [27] Verse 45 and the first hemistich of verse 46 are omitted in A, D. [28] पूजयेत्—B, C.

तद् यथा—

"आयाहीन्द्र महाराजाधिराज वज्रहस्त स्वबल[29]वाहनावृत इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ[30] पूर्वद्वारम् अभिरक्ष अभिरक्ष"—इत्यावाह्य "ॐ त्रातारमिन्द्रम्" इत्यनेनार्घ्यं दत्त्वा गन्धादिभिरर्चयेत् ॥ १ ॥

"ॐ[31] आयाहि चित्रभानो महाराजाधिराज शक्तिहस्त स्वबलवाहनावृत इहागच्छ इहागच्छ तिष्ठ[32] आग्नेयीं दिशम् अभिरक्ष रक्ष"—इत्यावाह्य "ॐ अग्निर्मूर्धा दिव" इत्यनेन अर्घ्यं दत्त्वा गन्धादिभिरभ्यर्चयेत्[33] ॥ २ ॥

"ॐ आयाहि यम* महाराजाधिराज स्वबलवाहनावृत[34] दण्डहस्त रक्तान्तायतलोचन इहागच्छ इहागच्छ तिष्ठ तिष्ठ[35] दक्षिण-द्वारमभिरक्ष रक्ष"—इत्यावाह्य "ॐ वैवस्वतं सङ्गमनम्" इत्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्चयेत् ॥ ३ ॥

"ॐ आयाहि निर्ऋते[36] महाराजाधिराज स्वबलवाहनावृत खड्गहस्त महाबल[37] इहागच्छ[38] तिष्ठ तिष्ठ नैर्ऋतीं दिशम् अभिरक्ष रक्ष"—इत्यावाह्य[39] "ॐ एष ते निर्ऋते[40]" इत्यनेन अर्घ्यं दत्त्वा गन्धादिभिरभ्यर्चयेत् ॥ ४ ॥

[29] सुबल—B, C. [30] इह तिष्ठ इह तिष्ठ—A, B.; तिष्ठ तिष्ठ—C. D. [31] ॐ omitted in B. [32] तिष्ठ तिष्ठ is expected here. [33] ...र्चयेत—C. * आयाहीन्द्र—F. [34] स्वबल ..वृत—omitted in C. [35] तिष्ठ तिष्ठ—omitted in C. [36] नैर्ऋते—C, D. [37] महाबल—omitted in C. [38] इहागच्छ इहागच्छ—is expected here which is found in D. [39] B omits the portion beginning from ॐ आयाहि यम...up-to इत्यावाह्य। [40] नैर्ऋत—C.

"ॐ आयाहि वरुण महाराजाधिराज पाशहस्त स्वबलवाहनावृत इहागच्छ इहागच्छ तिष्ठ तिष्ठ पश्चिमद्वारम् (ऊर्ध्वां दिशम्)[41] अभिरक्ष रक्ष"—इत्यावाह्य "ॐ उरुं हि राजा वरुणश्चकार" इत्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्चयेत् ॥ ५ ॥

"ॐ आयाहि पवन[42] महाराजाधिराज ध्वजहस्त स्वबलवाहनावृत इहागच्छ इहागच्छ तिष्ठ तिष्ठ वायवीं दिशमभिरक्ष रक्ष"—इत्यावाह्य "ॐ वात आ वातु भेषजम्" इत्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्चयेत् ॥ ६ ॥

"ॐ आयाहि सोम महाराजाधिराज शङ्खहस्त स्वबल-वाहनावृत इहागच्छ इहागच्छ तिष्ठ तिष्ठ उत्तरद्वारम् अभिरक्ष रक्ष"—इत्यावाह्य "ॐ सोमं राजानम्" इत्यनेन अर्घ्यं दत्त्वा गन्धादिभिरभ्यर्चयेत् ॥ ७ ॥

"ॐ आयाहीशान महाराजाधिराज शूलहस्त स्वबल-वाहनावृत इहागच्छ इहागच्छ तिष्ठ तिष्ठ ऐशानीं दिशम् अभिरक्ष रक्ष"—इत्यावाह्य "ॐ ईशानमस्य" इत्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्चयेत् ॥ ८ ॥

"ॐ आयाहि चतुर्मुख सर्वलोकाधिपते स्रुक्स्रुवहस्त[43] स्वबल-वाहनावृत इहागच्छ इहागच्छ तिष्ठ तिष्ठ ऊर्ध्वां दिशमभिरक्ष रक्ष"—इत्यावाह्य "ॐ हिरण्यगर्भः समवर्तताग्र" इत्यनेनार्घ्यं दत्त्वा इन्द्रेशानयोर्मध्येऽ गन्धादिभिरर्चयेत् ॥ ९ ॥

[41] B omits ऊर्ध्वां दिशम्। [42] वायो—B, C. [43] स्रुक्स्रुवह—omitted in B.
ऽ ऐशान्यां—A, B.

"ॐ आयाह्यनन्त महाराजाधिराज स्वबलवाहनावृत लाङ्गल-
हस्त इहागच्छ इहागच्छ तिष्ठ तिष्ठ अधोदिशमभिरक्ष रक्ष"—
इत्यावाह्य "ॐ नमोऽस्तु सर्पेभ्य" इत्यनेनार्घ्यं दत्त्वा
(निर्ऋति-वरुणयोर्मध्ये)* गन्धादिभिरर्चयेत् ॥ १० ॥

एवमभ्यर्च्य लोकेशांस्ततो भूमिपरिग्रहम् ॥
कुर्वीत वक्ष्यमाणं तत् साम्प्रतं शृणु सुव्रत[44] ॥ ४७ ॥

॥ ३४ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे चतुस्त्रिंशः दिकपाल[45]-यागपटलः ॥ ३४ ॥

पञ्चत्रिंशः पटलः

श्रीभगवान् उवाच—

व्रीहीनाहृत्य देवेश वासुदेवेन चार्चयेत् ।
क्षिपेच्च नारसिंहेन पातालमुषलेन च[1] ॥ १ ॥
सिद्धार्थकान् क्षिपेद् ध्यायन्[2] सिंहमन्त्रेण मन्त्रितान् ।
रक्षोघ्नान् पञ्चगव्येन प्रोक्षयेद् भूमिमादरात् ॥ २ ॥
ततस्ताम्रमयं कुम्भं मृन्मयं वा नवं दृढम् ।
जलपूर्णं स्थापयित्वा सरत्नं करकायुतम्[3] ॥ ३ ॥
ऐशान्यामर्चयेत् तस्मिन् साङ्गं गन्धादिना हरिम् ।
अस्त्रमन्त्रेण करकां शतधारां समर्चयेत्[क] ॥ ४ ॥

*A note in D adds here निर्ऋतिवरुणयोर्मध्ये । [44] सत्तम—B, C.सुव्रते—E, F. [45] दिक्पाल-लक्षण—B. [1] तु—A. [2] नित्यं—B, C. [3] सरत्नकरकायुतम्—B, C. ...करकान्वितम्—F. [क] तमर्चयेत्—Var. ed. ; शतधारांस्तु मन्त्रयेत्—F.

तद्वाराच्छिन्नया सिञ्चेन्मण्डपं तं[4] प्रदक्षिणम् ।
कुम्भं तं पृष्ठतो नीत्वा कुम्भमन्त्रेण देशिकः ॥ ५ ॥
व्रीहीन् संहृत्य सर्वांस्तु कुम्भं तत्रोपरि न्यसेत् ।
पुनः संपूजयेद् विष्णुं कलसेषु समाहितः ॥ ६ ॥
वस्त्रयुग्मेन कलसमेकेन करकां बुधः ।
छादयित्वा ततो गृह्य करणीं मण्डलं लिखेत्[ख] ॥ ७ ॥
चतुरस्रं चतुर्द्वारं चक्राब्जं षोडशारकम् ।
पञ्चवर्णेण चूर्णेन द्वादशारमथापि वा[5] ॥ ८ ॥
वेद्यामेवं लिखित्वा च मण्डपे पूर्वदक्षिणे ।
चतुर्हस्तं चतुष्कोणं मध्ये पङ्कजभूषितम् ॥ ९ ॥
चतुर्द्वारं तु चूर्णेन स्वस्तिकं मण्डलं लिखेद् ।
तदूर्ध्वं[6] न्यस्य पर्यङ्कं कुशान् संस्तारयेत्[7] ततः ॥ १० ॥
"(ॐ)[8] योगे योगे"ति मन्त्रेण गन्धतोयेन प्रोक्षयेत् ।
तूलिकां विन्यसेत् तत्र दिव्यपट्टांशुकान्विताम् ॥ ११ ॥
उपधानद्वयं दत्त्वा पार्श्वे गण्डूकमेव च ।
कपोलधारणं दत्त्वा कुर्यादूर्ध्वं वितानकम् ॥ १२ ॥
पुष्पमालापरिक्षिप्तं मुक्ताहारोपशोभितम् ।
कुर्यात् पुष्पगृहं हृद्यं[9] मलयागुरुधूपितम् ॥ १३ ॥
विद्याधिपास्तु[10] संपूज्याः शक्त्या[11] दिक्षु विदिक्षु च ।
विष्णुर्मधुलिहा चैव तथैव च त्रिविक्रमः ॥ १४ ॥
वामनश्चापि दिक्ष्वेते पूर्वाद्यासु व्यवस्थिताः ।
श्रीधरश्च हृषीकेशः पद्मनाभस्तथैव च ॥ १५ ॥

[4] तु—C. [ख] नयेत्—D. [5] वा is omitted in A, B. [6] ततोऽर्धं—A.; ततोऽर्धे—D. तत्रोर्ध्वं—F. [7] संभारयेत्—A. [8] ॐ is found in C only. [9] पुष्पं गृहं कृत्यं—C. [10] विद्याधिपस्तु—C. [11] शय्यायां—C.; शय्यायां दिग्विदिक्षु च—F.

दामोदरश्च संपूज्या आग्नेयादि-व्यवस्थिताः ।
एवमर्च्य ततः पश्चात् ऐशान्यां स्नानमण्डपे ॥ १६ ॥
चतुःस्तम्भयुते रम्ये तन्मध्ये वेदिका शुभा ।
चतुरस्रा चतुर्दिक्षु जलनिर्गमनान्विता[12] ॥ १७ ॥
क्षीरिवृक्षोद्भवं पीठं मध्ये तस्यां निवेशयेत् ।
स्नानद्रव्याणि सर्वाणि समानीय विचक्षणः ॥ १८ ॥
निक्षिप्य स्नानकुम्भेषु कुम्भांस्तानधिवासयेत् ।
रत्नानि च चतुर्दिक्षु सिद्धद्रव्यान्विताः शुभाः ॥ १९ ॥
कलसाः स्थापनीयास्तु अभिषेकार्थमादरात् ।
वटोदुम्बरकाश्वत्थ[13]-चम्पकाशोकश्रीद्रुमा[14] ॥ २० ॥
पालाशार्जुनवृक्षाच्च[15] कदम्बवकुलाम्रजान् ।
पल्लवांस्तु[16] समानीय पूर्वकुम्भे विनिक्षिपेत् ॥ २१ ॥
पद्मकं रोचनां दूर्वां दर्भपिञ्जूलमेव च ।
जातीपुष्पं कुन्दपुष्पं चन्दनं रक्तचन्दनम् ॥ २२ ॥
सिद्धार्थं तगरं चैव वञ्जुलं[17] दक्षिणे न्यसेत् ।
सुवर्णं रजतं चैव कूलद्वयमृदं तथा ॥ २३ ॥
नद्याः समुद्रगामिन्या विशेषाज् जाह्नवीमृदम्[18] ।
गोमयं च यवान् शालीन् तिलांश्च पश्चिमे[19] न्यसेत् ॥ २४ ॥
विष्णुपर्णीं श्यामलतां भृङ्गराजं शतावरीम् ।
गुडूचीं सहदेवां च विन्यसेदुत्तरे घटे[20] ॥ २५ ॥
फलान्युदकयुक्तानि आग्नेय्यां विन्यसेद् घटे ।
पञ्चगव्यं तु नैर्ऋत्यां कुम्भे कृत्याभिमन्त्रयेत्[21] ॥ २६ ॥

[12] ...सान्विता—C. [13] ...श्वत्थान्—C.; ...श्वत्थात्—A, B. [14] ...शोकजद्रुमान्—C.; ...शोकजद्रुमात्—A, B. [15] ...वृक्षांस्तु—C, F. [16] पल्लवास्तु—C. [17] तण्डूलं—C. [18] जलम्—A. [19] ...व परे—A, B.; ...श्चैवापरे—C. [20] विन्यसेच्च महौषधिम्—C. [21] कृत्वाभिमन्त्रितः—B, C.; A f. n.

वटाश्वत्थपलाशानां बिल्वस्योदुम्बरस्य[22] च ।
कषायोदकसंयुक्तं वायव्यां कलसं न्यसेत् ॥ २७ ॥
कुमारीमसृतां चैव शतमूलीं शतावरीम् [23] ।
सहदेवीं[24] वचां सिंहीं बलां व्याघ्रीं सलक्षणाम्[ग] ॥ २८ ॥
ऐशान्यामपरे कुम्भे मङ्गलाख्यां[25] निवेशयेत् ।
वल्मीकमृत्तिकां सप्तस्थानोत्थामपरे न्यसेत् ॥ २९ ॥
जाह्नवीवालुकां तोयं विन्यसेदपरे घटे ।
वराहवृषनागेन्द्रविषाणोद्धृतमृत्तिकाम् ॥ ३० ॥
कूलद्वयमृदं नद्या विन्यसेदपरे घटे ।
मृत्तिकां पद्ममूलस्य कुशस्य त्वपरे घटे ॥ ३१ ॥
तीर्थपर्वतमृद्भिस्तु युक्तमप्यपरे न्यसेत् [26] ।
नागकेशरपुष्पं च काश्मीरमपरे न्यसेत् ॥ ३२ ॥
चन्दनागुरुकर्पूरैः पूर्यं चैवापरं[27] न्यसेत् ।
वैदूर्यं विद्रुमं मुक्तां स्फटिकं वज्रमेव च ॥ ३३ ॥
एतान्येकत्र निःक्षिप्य स्थापयेद् देवसत्तम ।
नदीनदतडागानां सलिलैरपरे[28] न्यसेत् ॥ ३४ ॥
एकाशीतिपदे चान्यान् मण्डपे कलसान् न्यसेत् ।
पूरितान् गन्धतोयेन धान्यस्थान् तांस्तु मन्त्रयेत् ॥ ३५ ॥
श्रीसूक्तेन समस्तेन सर्वान् एव सकृत् सकृत् ।
कलसानधिवास्यैवमर्घ्यादीन् विनिवेशयेत् ॥ ३६ ॥
यवं सिद्धार्थकं गन्धं कुशाग्रं चाक्षतं तथा ।
तिलान् फलं तथा पुष्पमर्घ्यार्थं पूर्वतो न्यसेत् ॥ ३७ ॥

[22] ..स्योदुम्बरस्य—B, C. [23] सहावरीम्—A. [24] सहदेवां—B, C. [ग] व्याघ्री-मलक्षणाम्—var. ed. [25] मङ्गलाख्यं—B, C. [26] घटे—A. [27] पूर्यं च वा परे—C. पूर्यं चैवापरे—A, B. [28] —रपरं—B, C.

पद्मं श्यामलतां दूर्वां विष्णुपर्णीं कुशांस्तथा ।
पाद्यार्थं दक्षिणे भागे स्थापयेद् देशिकोत्तमः ॥ ३८ ॥
स्थापयेत् पश्चिमे भागे मधुपर्कं सुसंवृतम्[29] ।
कक्कोलकं लवङ्गं च तथा जातीफलं शुभम् ॥ ३९ ॥
उत्तरे स्थापयेद् भागे द्रव्यमाचमनाय च[30] ।
आग्नेय्यां स्थापयेद् पात्रं पूर्णं दूर्वाक्षतैर्बुधः ॥ ४० ॥
नीराजनार्थं देवेश देवदेवस्य सर्वदा ।
नैर्ऋत्यामुदकं* गन्धयुक्तं स्नानाय विन्यसेद् ॥ ४१ ॥
उद्वर्तनार्थं[31] वायव्यां गन्धपिष्टं निवेशयेत् ।
न्यसेदामलकं पात्रे सुरामांसीयुतं शुभम्[32] ॥ ४२ ॥
सहदेवां सदा भद्रां कुशाग्राल् रजनीं तथा ।
ऐशान्यां विन्यसेत् पात्रे शिरीषं सूर्यवर्तिनीम्[33] ॥ ४३ ॥
निर्मञ्छनाय देवस्य स्थापकः सुसमाहितः ।[34]
अष्टौ दिक्षु न्यसेद् विद्वान् धातु[35]-यष्टिप्रदीपकान् ॥ ४४ ॥
शङ्खं चक्रं च श्रीवत्सं कौस्तुभं[36] पङ्कजादिकम् ।
हेमादिपात्रे कृत्वा तु गोमयेनाथ पत्रकैः[37] ॥ ४५ ॥
नीराजनार्थं[38] देवस्य तथा वै पुष्पजातयः ।
स्थापनीयास्तथा चान्ये मङ्गल्याः स्नानचोदिताः ॥ ४६ ॥

॥ ३५ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे पञ्चत्रिंशः कलसाधिवासनपटलः ॥ ३५ ॥

[29] सुसम्मितम्—B, C. [30] तु—A, D.; द्रव्यमाचमनीयकम्—F. *पिष्टकं—F. [31] उद्वर्तनाय—A. [32] तथा—B, C. [33] ...वर्तिनम्—C. [34] This line is omitted in B, C. [35] लौह—C, लोह—D, F. [36] कलसं—C. [37] नल्वकैः—A, B.; वालुकैः—D, F. [38] नीराजनाय—A, C.

षट्त्रिंशः पटलः

श्रीभगवान् उवाच—

अतः संजनयेद्[1] वह्निं वैष्णवं विधिना गुरुः ।
ऐशान्यां गुरुकुण्डे तु प्राङ्मुखोदङ्मुखोऽपि वा ॥ १ ॥
तत्रैव होमयेद् विष्णुगायत्र्या[2] घृतमादरात् ।
अष्टोत्तरशतं हुत्वा सम्पातविधिना सुधीः ॥ २ ॥
सम्पाताज्येन कलसान् प्रोक्ष्य देशिकसत्तमः ।
लिप्तायां कारुशालायामुपतिष्ठेत संयतः ॥ ३ ॥
ब्राह्मणैर्वैष्णवैः सार्धं मूर्तिपैः शिल्पिभिः सह ।
महता ब्रह्मघोषेण सहायैर्बलवत्तरैः ॥ ४ ॥
काहला[3]शङ्खशब्दैश्च भेरीमुरजनिःस्वनैः ।
वीणावेणुस्वरैर्हृद्यैर्दिव्यगन्धस्वनैस्तथा[4] ॥ ५ ॥
आचार्यः प्राङ्मुखो भूत्वा कुर्यात् कौतुकबन्धनम् ।
"विष्णवे शिपिविष्टे"[5]ति गौरसिद्धार्थकेन तु ॥ ६ ॥
ऊर्णामयेन सूत्रेण निम्ब[6]दूर्वान्वितेन च ।
दुकूलवस्त्रे[7] बद्ध्वा तु दक्षिणे बन्धयेत् करे ॥ ७ ॥
देशिकस्यापि कर्तव्यं करे कौतुकबन्धनम् ।
ततो विकल्प्य वेदास्त्रं[8] तण्डुलैः पञ्चरङ्गकैः* ॥ ८ ॥
तन्मध्ये प्रतिमां स्थाप्य स्नाप्य चैव[9] यथाविधि ।
वस्त्रयुग्मेन संछाद्य[10] पूज्य गन्धादिना तु ताम्[11] ॥ ९ ॥
चामरैस्तालवृन्तैश्च वीजयेन्मङ्गलान्विताम् ।[12]
शिविकायां[a] निवेश्याथ प्रतिमां संस्तवेत् ततः ॥ १० ॥

[1] संज्वलयेद्—B, C. [2] विष्णुं गायत्र्या—C. [3] काहाला—A. [4] हृद्यैस्तिथ्यैर्गगीतस्वनैः—B, C. [5] शिपिविष्टेति—A, B; शिविपिष्टेति—C. [6] निम्बं—B, C. [7] ..वस्त्रैः—B, C. [8] देवास्त्रं—A, D. *पञ्चवर्णकैः—F. [9] देव—A. [10] संस्थाप्य—A.; संहृत्य—B.; संस्थाप्य—C. [11] तथा—B, C. [12] This line is omitted in B, C. [a] एडकार्यां—F.

"ॐ[13] नमस्तेऽर्च्ये सुरेशानि प्रणीते विश्वकर्मणा ।
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः ॥ ११ ॥
त्वयि संपूजयामीशे नारायणमनामयम् ।
रहिता शिल्पदोषैस्त्वमृद्धियुक्ता सदा भव" ॥ १२ ॥
एवं विज्ञाप्य प्रतिमां नयेत् तां स्नानमण्डपम् ।
ध्रियमाणवितानेन ब्रह्मघोषेण तां बुधः ॥ १३ ॥
भद्रपीठे समारोप्य "भद्रं कर्णे"ति कीर्तयेत् ।
स्नापयेच्छुद्धतोयेन शुद्धवत्या तु देशिकः ॥ १४ ॥
स्नापिता गन्धतोयेन शिल्पदोषैर्विमुच्यते[14] ।
मन्त्रैर्गन्धादिनाभ्यर्च्य छादयेत् शुक्लवाससा ॥ १५ ॥
पूजयित्वा तु प्रतिमां शिल्पिनं तोषयेत् ततः ।
गन्धपुष्पादिभिर्विप्रं तोषयेत् कटकादिभिः ॥ १६ ॥
सर्वेऽथ कर्मिणस्तोष्या[15]स्तस्मिन् काले पृथक् पृथक् ।
क्षमापयीत तान् सर्वान् प्रियप्रश्नेन सर्वथा ॥ १७ ॥
यजमानस्ततो भक्त्या देशिकं परितोषयेत् ।
कांस्यदोहां[16] वस्त्रकण्ठां ताम्रपृष्ठां पयस्विनीम् ॥ १८ ॥
रौप्याङ्घ्रीं स्वर्णशृङ्गां तां[17] सुशीलां तरुणीं शुभाम् ।
प्रणम्य विधिना धेनुं दद्याद् वाग्भिः क्षमापयेत् ॥ १९ ॥
अवधार्य जगच्छान्तिं नेत्रे चोन्मीलयेद् बुधः ।
"चित्रं देवे" ति मन्त्रेण ज्योतिर्देवस्य चोत्किरेत् ॥ २० ॥
"अग्निर्ज्योती" ति मन्त्रेण ज्ञात्वा दृष्टिं प्रकल्पयेत् ।
दृष्टिभेदांस्तु सकलान् वर्णयिष्ये तवोपरि ॥ २१ ॥
ततः शुक्लानि पुष्पाणि घृतं[18] सिद्धार्थकं तथा ।
दूर्वां कुशाग्रं देवस्य दद्याच्छिरसि[क] देशिकः ॥ २२ ॥

[13] ॐ omitted in A. [14] प्रमुच्यते—B, C. [15] तस्या—B, C. [16] कांसदेहां—B, C. [17] च —B, C. [18] घृत—A. [क] ···च्छिराणि—var. ed.

पठन् रक्तोहणं सर्व[19]मन्त्रमाथर्वणं तथा ।
रौप्यं भाजनमादाय मधुरत्रयसंयुतम् ॥ २३ ॥
"मधु वाते" ति मन्त्रेण मन्त्रयित्वाष्टधा पुनः ।
शलाकया सुवर्णस्य नेत्रे चाभ्यञ्जयेद् गुरुः ॥ २४ ॥
हिरण्यगर्भमन्त्रेण "इमं मे" ति च[20] कीर्तयन् ।
घृतेनाभ्यञ्जयेत् पश्चात् पठन् घृतवतीं बुधः ॥ २५ ॥
मसूरचूर्णेनोद्वर्त्य "अतो देवे"[21] ति कीर्तयन् ।
स्नालयेदुष्णतोयेन "सप्त तेऽग्ने" ति देशिकः ॥ २६ ॥
चन्दनेनानुलिम्पेच्च "द्रुपदादिव" इत्यृचा ।
नादेयैः स्नापयेत्[22] तोयै "रापो हि ष्ठे" ति देशिकः ॥ २७ ॥
स्नापयेद्[23] रत्नतोयेन पावमानीभिरेव च ।
"समुद्रं गच्छ" मन्त्रेण स्नपयेच् चन्दनोदकैः ॥ २८ ॥
नागकेशरतोयेन "श्रीश्च ते" त्यभिषेचयेत् ।[24]
तीर्थमृत्कलसेनाथ "शन्नो देवी" ति सेचयेत्[25] ॥ २९ ॥
गायत्र्या गन्ध[26]तोयेन पञ्चमृत्तिकया ततः ।
"हिरण्यवर्णाः शुचय" इति मन्त्रेण सेचयेत् ॥ ३० ॥
"इमं मे" ति च मन्त्रेण स्नपयेत्[27] सिकताजलैः ।
वल्मीकतोयेन हरिं "तद्विष्णो" रिति स्नापयेत्[28] ॥ ३१ ॥
"या ओषधी" ति मन्त्रेण स्नानमोषधिमङ्गलम्[29] ।
"यज्ञाय[30] यज्ञे" ति मन्त्रेण दद्यात् काषाय[31]पञ्चकम्[32] ॥ ३२ ॥
"पयः पृथिव्या" मन्त्रेण पञ्चगव्येन सेचयेत् ।
"याः फलिनी" रिति* हरिं फलतोयेन सेचयेत्[33] ॥ ३३ ॥

[19] सर्वं—B. [20] इमं मे इति च—B. [21] नोद्वर्तदतो देवेति—A. [22] स्नपयेत्—A. [23] स्नपयेत्—A. [24] B, C, omit this line. [25] This line is omitted in A. [26] पद्म—A. [27] स्नापयेत्—C. [28] मन्त्रयेत्—B ; सेयेत्—C. [29] मङ्गलौषधिवारिणा—B, C. [30] यज्ञा—C. [31] कषाय—C. [32] पङ्कजम्—A, B. ; काषायजं जलम्—D. *याः फलिनीति—F. [33] B omits this line.

"विश्वतश्चक्षु" रित्युक्त्वा उदकुम्भेन सेचयेत् ।
"सोमं राजान" इत्येवं, पूर्वकुम्भेन सेचयेत् ॥ ३४ ॥
"विष्णो विराट" मन्त्रेण दक्षिणेनाभिषेचयेत् ।[34]
"हंसः शुचि" रित्येवं पश्चिमेनाभिषेचयेत्[35] ॥ ३५ ॥*
"मूर्धानं दिव" मन्त्रेण कुर्यादुद्वर्तनं हरेः ।
धात्रीफलं मुरामांसीयुतं शिरसि दापयेत् ॥ ३६ ॥
"मा नस्तोके"ति मन्त्रेण ततो गन्धोदकैः पुनः ।
"गन्ध द्वारे"ति मन्त्रेण ततः स्नानं समाचरेत् ॥ ३७ ॥
एकाशीतिपदन्यस्तैर्घटैर्मलयभूषितैः ।
"इदमापे"ति मन्त्रेण सर्वैरेवाभिषेचयेत् ॥ ३८ ॥
आवाहयेत् ततो विष्णुं शुद्धस्फटिकसन्निभम् ।
"एह्येहि भगवन् विष्णो लोकानुग्रहकारक ॥ ३९ ॥
यज्ञभागं गृहाणेमं वासुदेव नमो नमः ।"
अनेनावाह्य देवेशं कुर्यात् कौतुकमोचनम् ॥ ४० ॥
"मुञ्चामि त्वे"[36]ति मन्त्रेण देशिकस्यापि मोचयेत् ।
"हिरण्मये"[37]ति मन्त्रेण चार्घ्यं देवाय दापयेत् ॥ ४१ ॥
"अतो देवे"ति सूक्तेन पाद्यं कृष्णाय मन्त्रितम् ।
"मधु वाते"ति मन्त्रेण मधुपर्कं निवेदयेत् ॥ ४२ ॥

[34] This and the preceding lines are omitted in AB. [35] A omits this line, इषः स्वविरोत्येवं पश्चिमेन -B, C.

*D. replaces verses 34 & 35 by the following :—

"सोमो राजे"ति मन्त्रेण महौषधिजलेन च ।
"वरुणस्ये"ति मन्त्रेण स्नपयेज् जाह्नवीजलैः ॥ ३४ ॥
"समुद्रं गच्छ" मन्त्रेण जातीपुष्पोदकेन च ।
"आपो हि ष्ठे"ति मन्त्रेण स्नपयेत् पल्लवोदकैः ॥ ३५ ॥

[36] मुञ्चमित्विति—B, C. [37] हिरण्मयेन—C.

"मयि गृह्णामि"[38] मन्त्रेण दद्यादाचमनं बुधः।
"अक्षन्नमी"ति मन्त्रेण* किरेद् दूर्वाक्षतं बुधः॥ ४३॥
निर्मञ्छनं ततः कुर्याद् "काण्डात् काण्डे"ति देशिकः।
गन्धं "गन्धवती"त्येवम् "उन्नयामी"ति माल्यकम्॥ ४४॥
"इदं विष्णव"ति मन्त्रेण दद्यात् यज्ञोपवीतकम्।
"बृहस्पते"ति मन्त्रेण वस्त्रयुग्मं प्रदापयेत्॥ ४५॥
"वेदाहमेतं पुरुषम्" उत्तरीयं निवेदयेत्।
सकलीकरणं कुर्यात् पठन्नथ महाव्रतम्[40]॥ ४६॥
"ओषधयः संवदन्ते" पुष्पप्रकिरणं[41] ततः।
"धूरसी"ति पठन् भक्त्या धूपं दद्यात् सगुग्गुलम्[42]॥ ४७॥
"विश्वाडि"ति च सूक्तेन अञ्जनं तु[43] प्रदापयेत्।
"मुञ्चन्ती"[44]ति मन्त्रेण रोचना[45]तिलकं तथा॥ ४८॥
दद्यात् पुष्पाणि[46] माल्यानि "दीर्घायुष्टे"ति मन्त्रवित्।
"इन्द्र शुद्धे"ति[47] मन्त्रेण श्वेतं छत्रं प्रदापयेत्॥ ४९॥
आदर्शं तु[ख] विराजेन विकर्णेन तु चामरम्।
रथन्तरेणाभरणं व्यजनं वायुदैवतैः[ग]॥ ५०॥
"मुञ्चामि त्वे"ति सूक्तेन पुष्पमालार्चनं ततः।
ततः स्तुवीत गोविन्दं मन्त्रैर्वेदादिभिर्विभुम्॥ ५१॥
तथा पुरुषसूक्तेन बृहत्साम्ना सुरोत्तमम्।
"शशिकर्णी"ति नवभिः सूक्तैः सुरगणार्चितम्॥ ५२॥

[38] मयि गृह्णाति—A, B.; मयि ग्रथ्नाति—F. * अक्षन्नवीमदन्तेति—F.; अक्षन्नवीमदन्तेति—E. [39] इदं विष्णुरिति—C. [40] पठन्नृत—A.; पठन्नत्र मधुव्रतम्—F. [41] ···प्रकरणं—B, C; पुष्पकरणं—D; ···समम(व)दन्तेति—Var. ed. [42] ···गुग्गुलुम्—B, C. [43] प्रदीपस्तु—B, C. [44] दुञ्जन्तीति—A. [45] रोचनां—B. [46] पौष्पाणि—B, C. [47] इन्द्रश्छत्रेति—B; इन्द्रशुद्र —F; इन्द्रसुद्र ति —E. ख आददांशु—Var. ed. ग वासुदैवतम्—F.

श्रायन्तीयेन[48] च स्तूयाद् गुह्योपनिषदैस्ततः ।
सर्वमेतत् समं कुर्याद् पिण्डिकायामपि द्विज ॥ ५३ ॥
देवस्योत्थानसमये सौपर्णं[a] सर्वमुच्चरेत् ।
"उत्तिष्ठे"ति समुत्थाप्य कुर्याद् ब्रह्मरथे शुभे ॥ ५४ ॥
शाकुनेन तु सूक्तेन मण्डपे सन्निधापयेत् ।
पुष्पोपशोभिते स्थाने चन्द्रातपविभूषिते ॥ ५५ ॥
मुक्ताहारैर्लम्बमाने दीपमालो[49]पशोभिते ।
भक्ष्यभोज्यैरनेकैश्च सान्द्र[50]पल्लवशोभिते ॥ ५६ ॥
दिव्यपर्यङ्कन्यस्तायां तूलिकायां सुरोत्तम ।
अतो देवे[51]ति सूक्तेन शय्यायां स्थापयेद्धरिम् ॥ ५७ ॥
तथाविधेऽपरे स्थाने पिण्डिकां सन्निवेशयेत् ।
श्रायन्तीयेन सूक्तेन श्रीसूक्तेन निवेशयेत्[52] ॥ ५८ ॥
[सकलीकरणं कुर्याद् विष्णोरुरसि "त्रिष्वि" ति ।
दर्शयेच्च ततो भक्त्या हिरण्य*मङ्गलाष्टकम् ॥ ५९ ॥
मृगराजं वृषं नागं व्यजनं कलसं तथा ।
वैजयन्तीं तथा भेरीं दीपमित्यष्टमङ्गलम् ॥ ६० ॥
रौप्यजं वा सर्वमेतमश्वसूक्तेन दापयेत् ।
उख्या[a]पिधानकं पात्रं सिच्चिकां[b] दर्विकां तथा ॥ ६१ ॥
मुषलोदुखले चैव शिलां संमार्जनीं तथा ।
तथा भोजनभाण्डानि गृहोपकरणानि च ॥ ६२ ॥
पाददेशे तु वै दद्यात् "त्रिपादस्ये" ति साधकः ।
"यज्ञेन" इति मन्त्रेण शिरोदेशे निवेशयेत्[53] ॥ ६३ ॥]

[48] श्रीयन्तीयन—B. C. ; शान्तातोयेन—A. ; शन्तोतीयेन—D. F. ; शन्तोतीये च—E. [a] सौवर्णं—F. [49] दीपमाल्यो—B. C. [50] पात्र—C. [51] अतो देति—A. [52] This line is omitted in B. * हैरण्य—E, F. (a) भक्ष्यं—F. (b) मक्षिकां—E. [53] निवेदयेत्—C.
[ ] Verses 59, 60, 61, 62 and 63 are omitted in A, D.

मित्राख्यं[54] कलसं रत्नगर्भं वस्त्रयुगान्वितम्[55]।
खण्डखाद्यैरनेकैश्च पूरयित्वा समन्ततः ॥ ६४ ॥
एष साधारणः प्रोक्तः स्नपनस्य विधिर्मया।
य एवं[56] विधिवत् कुर्यात् तस्य पुण्यफलं शृणु ॥ ६५ ॥
यावन्ति जलबिन्दूनि मद्गात्रे विनिवेशयेत्।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ६६ ॥
॥ ३६ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे षट्त्रिंशः स्नपन*पटलः ॥ ३६ ॥

सप्तत्रिंशः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि अधिवासननिर्णयम्।
येन वै कृतमात्रेण सान्निध्यं मम जायते ॥ १ ॥
सर्वज्ञं सर्वगं ध्यात्वा आत्मानं पुरुषोत्तमम्।
ॐकारेण समायोज्य चिच्छक्तिमभिमानिनीम् ॥ २ ॥
निःसार्यात्मैकतां कृत्वा तस्मिन्[1] गर्भ[2]गते विभौ।
शोषयेन्मरुता पृथ्वीं वह्निबीजेन दीपयेत् ॥ ३ ॥
संहरेद् वायुना चाग्निं वायुमाकाशतां नयेत्।
अधिभूताधिदैवैस्तु साध्यात्मै[3]र्विषयैः सह ॥ ४ ॥
तन्मात्रमात्रकान् कृत्वा संहरेत् तान् क्रमाद् बुधः।
आकाशं मनसा कृत्य मनोऽहङ्करणे कुरु ॥ ५ ॥

[54] निद्राख्यं—A, F. [55] कुशान्वितम् —A. [56] एनं—A. * ...स्नानपटलं—D, F.
[1] अस्मिन्—B, C. [2] सर्व —B, C. [3] साध्यात्मे—A.

अहंकारं च महति तं चाप्यव्याकृतं[क] नयेत् ।
शान्तेऽनन्ते निष्प्रपञ्चे निर्मलं ज्ञानविग्रहम् ॥ ६ ॥
ध्यायेत् तत् परमानन्दे[4] शुद्धे बुद्धेऽमलेऽव्यये ।
लीनमव्याकृतं यत्र तत्संस्थं यत्स्वरूपकम् ॥ ७ ॥
परमं ब्रह्मणः शक्तिं तं विद्धि परमेष्ठिनम् ।
वासुदेवः स विज्ञेयो ज्ञानदेहो मनीषिभिः ॥ ८ ॥
स तामव्याकृतिं[5] मायामवष्टभ्य सिसृक्षया ।
शब्दात् स्वमूर्तिं[6]मसृजत् स्पर्शाख्यां पौरुषीं ततः ॥ ९ ॥
संकर्षणः स विज्ञेयः सर्वलोकमहेश्वरः ।
स तु संकर्षणः क्षोभ्य मायां[7]मव्याकृतिं स्वयम् ॥ १० ॥
सर्वतेजोमयं रूपं प्रद्युम्नं[8] सोऽसृजत् प्रभुः ।
प्रद्युम्नं[9] स सिसृक्षन्[10] वै रसमात्रासु संसृजत् ॥ ११ ॥
अनिरुद्धं महाबाहुमेकार्णवजलेशयम् ।
सोऽसृजद् गन्धतन्मात्राद् देवदेवं चतुर्मुखम् ॥ १२ ॥
शक्तयः पञ्च विख्याता देवस्य परमात्मनः ।
अधिभूताधिदेवस्य अध्यात्मस्य च कारणम् ॥ १३ ॥
एतास्तन्मात्रशब्देन कीर्तिता मुनिभिः सदा ।
देवः सर्वात्मको ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ॥ १४ ॥
तोयं ससर्ज भगवान् तस्मिन्नण्डमथासृजत् ।
पञ्चभूतात्मकं भूतं शुभं दिव्यं हिरण्मयम् ॥ १५ ॥
तस्मिन् संक्रमते जीवशक्तिरात्मोपसंहृता[11] ।
पञ्चतन्मात्रकाधारा संहृताखिलवृत्तिका[12] ॥ १६ ॥
प्राणो जीवेन संयुक्तो "वृत्तिमान्" इति शब्द्यते ।
जीवो व्याकृतसंज्ञस्तु प्राणस्त्वाध्यात्मिकः स्मृतः ॥ १७ ॥

क ''व्याकृते —D. [4] तत् तत् परानन्दे—A. [5] अव्याकृतिः—B, C. [6] शब्दात्ममूर्ति—B, C. [7] क्षेमं मायया—A. [8] प्रयुक्तं—B. [9] प्रद्युम्नः—B. [10] सिसृक्षुर्वै—C. [11] शक्तिवाय्वोपसंस्कृता—C. [12] वृत्तिकी —A. C. F.

प्रार्थ्ययुक्ता ततो बुद्धिः संजाता चाष्टवृत्तिका[a]।
अहंकृतिस्ततो जज्ञे मनस्तस्मादजायत ॥ १८ ॥
अर्थाः[13] प्रजज्ञिरे पञ्च संकल्पादियुतास्ततः।
शब्दः स्पर्शश्च रूपं च रसो गन्ध इति स्मृताः ॥ १९ ॥
ज्ञानशक्तियुतान्येतै[14]रारब्धानीन्द्रियाणि तु।
त्वक्श्रोत्रघ्राणचक्षूंषि जिह्वा बुद्धीन्द्रियाणि च[ख] ॥ २० ॥
पादः पायु[15]स्तथा पाणी वाग् उपस्थश्च[ग] पञ्चमः।
कर्मेन्द्रियाणि चैतानि पञ्चभूतान्यतः शृणु ॥ २१ ॥
आकाशवायुतेजांसि सलिलं पृथिवी तथा।
स्थूलमेभिः शरीरं तु सर्वाधारं प्रजायते ॥ २२ ॥
एतेषां वाचका मन्त्राः प्रोच्यन्ते साम्प्रतं स्फुटम्।
जीवतत्त्वं मकारं तु देहस्य व्यापकं न्यसेत् ॥ २३ ॥
प्राणतत्त्वं भकारं तु जीवयोनि[16]गतं न्यसेत्।
हृदयस्थं बकारं तु बुद्धितत्त्वं न्यसेद् बुधः ॥ २४ ॥
फकारमपि तत्रैवमहंकारमपि न्यसेत्।
मनस्तत्त्वं पकारं तु न्यसेत् सङ्कल्पसम्भवम् ॥ २५ ॥
शब्दतन्मात्रतत्त्वं तु नकारं मस्तके न्यसेत्।
स्पर्शात्मकं धकारं तु वक्त्रदेशे तु विन्यसेत् ॥ २६ ॥
दकारं रूपतत्त्वं तु हृद्देशे विनियोजयेत्।
थकारं वस्तिदेशे तु रसतन्मात्रकं न्यसेत् ॥ २७ ॥
तकारं गन्धतन्मात्रं जङ्घायां विनियोजयेत्।
णकारं श्रोत्रयोर्न्यस्य ढकारं विन्यसेत् त्वचि ॥ २८ ॥
डकारं नेत्रयुग्मे तु रसनायां ठकारकम्।
टकारं नासिकायां तु ञकारं वाचि विन्यसेत् ॥ २९ ॥

(a) ···वृत्तिकी—A, C, F. [13] अन्याः—C. [14] ···न्येभिः—C. [ख] तु—A, B, C. [15] पादपद्म—C. [ग] ···स्थं तु—A, B, C. [16] जीवोपरि—B, C.

[भकारं करयोर्न्यस्य जकारं पादयोर्न्यसेत्।
छकारं पायुदेशे तु चकारं चाप्युपस्थके[घ] ॥ ३० ॥
विन्यसेत् पृथिवीभावं[17] ङकारं पादयुग्मके।]
नाभौ घकारमप्ततत्त्वं[18] तैजसं गं हृदि न्यसेत्॥ ३१ ॥
खकारं वायुतत्त्वं तु नासिकायां निवेशयेत्।
ककारं विन्यसेन्नित्यं खतत्त्वं मस्तके बुधः॥ ३२ ॥
हृत्पुण्डरीके संन्यस्य गकारं[ङ] सूर्यदैवतम्।
कलाद्वादशसंयुक्तं न्यसेत् तत्र विचक्षणः[च] ॥ ३३ ॥
द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः।
कलाषोडशसंयुक्तं सकारं तत्र चिन्तयेत्[19] ॥ ३४ ॥
तन्मध्ये चिन्तयेन्मन्त्री बिन्दुं[20] वह्नेस्तु मण्डलम्।
हकारं विन्यसेत् तत्र कलाभिर्दशभिर्युतम्॥ ३५ ॥
षकारं[21] विन्यसेत् पश्चात् प्रणवेन सुरोत्तम।
शकारश्च यकारश्च रेफो लश्च व एव च[22] ॥ ३६ ॥
आकारेण समायुक्ता नमस्कारान्तयोजिताः[23]।
प्रथमोङ्कारसंयुक्ता न्यसनीयाः सुरोत्तम॥ ३७ ॥
परमेष्ठी पौरुषी च निर्वृत्ति[24]र्विश्वसंज्ञिताः।
सर्वात्मशक्तिरित्येताः कीर्तिताः पञ्च शक्तयः॥ ३८ ॥
स्थाने तु प्रथमा प्रोक्ता द्वितीया आसने मता।
तृतीया शयने तद्वच् चतुर्थी यान[25]कर्मणि॥ ३९ ॥

[घ] देशे तु चकारं गुह्यमस्तके—D.; ततः परं छकारं तु पायुदेशे तु विन्यसेत्। ततः परं चकारं तु उपस्थे विन्यसेत् सुधीः।—K. [17] पृथिवीतत्त्वं—C, D, K [ ] A omits the lines within the box bracket. [18]··· तत्त्वस्तु—B, C. [ङ]···शंन्यस्य सकारं—D., अकारं—K. [च] This line is omitted in K. [19] विन्यसेत्—B, C. [20] वायं—B, C. [21] सोङ्कारं—B, C, D. [22] तथैव च—B, C. [23] संयुताः—B, C; नमस्कारान्त योजिता—K. [24] निवृतिः—A. [25] पान—B, C.

प्रत्यर्चायां पञ्चमी तु प्रयोक्तव्या विजानता।
क्षकारं विन्यसेन्मध्ये सर्वतेजोमयं शुभम्॥ ४०॥
ततो विचिन्तयेद् देवं परमात्मानमीश्वरम्।
पौरुषस्थं स्व[26]भावस्थं सर्वविज्ञानविग्रहम्॥ ४१॥
शान्तिसंभूति[27]कर्तारं चिन्तयेद् देशिकोत्तमः।
एवं सूक्ष्मतमं[28] देवं ज्ञानरूपं सुरेश्वरम्॥ ४२॥
वाच्यवाचकभावेन स्थितं व्याप्य स्वशक्तिभिः[29]।
मन्त्रमूर्तिं ततस्तस्य ध्यात्वा कुर्यात् तु देशिकः॥ ४३॥
या मूर्तिर्देशिकेनेह प्रारब्धात् तु प्रतिष्ठिता।
तस्यास्तु मूलमन्त्रेण मन्त्रन्यासं समाचरेत्॥ ४४॥
आदिमूर्तेस्तु वक्ष्यामि सकलीकरणं शृणु।
स्वविग्रहे तथार्चायां यत्कार्यं देशिकोत्तमैः॥ ४५॥
॥ ० ॥ "ओँ नमो भगवते वासुदेवाये" ति मूलमन्त्रः॥ ० ॥
ओँकारं शिरसि न्यस्य नकारं प्राणगोचरे।
मोकारं तु ललाटस्थं भकारं मुखमध्यतः॥ ४६॥
कण्ठदेशे गकारं तु वकारं हृदये तथा।
तेकारं दक्षिणभुजे वाकारं वामगोचरे॥ ४७॥
सुकारं वामजङ्घायां देकारं दक्षिणे स्थितम्[छ]।
वामपादे तु वाकारं यकारं दक्षिणे न्यसेत्॥ ४८॥
ओंकारं चिन्तयेत् प्राज्ञः स्फुरज्ज्वालावलीधरम्।
नकारं स्फटिकाभासं[ज] मोकारं चेन्द्र[30]नीलवत्॥ ४९॥
तेजोनिभं भकारं तु गकारं काञ्चनप्रभम्।
वकारं पद्मपत्राभं तेकारं स्वर्णसुप्रभम[31]॥ ५०॥

[26] शु—B, C. [27] संभूति—A, B. [28] सूक्ष्मजित्वं—B, C. [29] स्वशक्तितः—B, C.
[छ] दक्षसंस्थितम्—K. [ज] स्फुटिकाभाषि—D. [30] चन्द्र—A. [31] सप्रभम्—A, F.

वाकारं कुन्दसदृशं सुकारं विद्युतप्रभम्[32]।
देकारं कर्णिकाराभं वाकारं हिमसन्निभम्[33] ॥ ५१ ॥
पद्मरागसमाभासं यकारं तु विचिन्तयेत्।
केशवं शिरसि न्यस्य वक्त्रे नारायणं प्रभुम् ॥ ५२ ॥
ग्रीवायां माधवं देवं गोविन्दं भुजयुग्मके।
हृदये विन्यसेद् विष्णुं पृष्ठे तु मधुसूदनम् ॥ ५३ ॥
जठरे वामनं देवं कटिदेशे तु विक्रमम्[क]।
श्रीधरं वामजङ्घायां हृषीकेशं तथान्यतः[34] ॥ ५४ ॥
गुल्फदेशे पद्मनाभं पादे दामोदरं प्रभुम्।
हृदयादिषडङ्गञ्च यथायोगं च[35] विन्यसेत् ॥ ५५ ॥
एतत् साधारणं प्रोक्तमादिमूर्तेस्तु सत्तम।
अथवा यस्य देवस्य प्रथमे स्थापनं भवेत्[36] ॥ ५६ ॥
तस्यैव मूलमन्त्रेण सजीवकरणं भवेत्।
यस्या मूर्तेस्तु यन्नाम तस्याद्यं चाक्षरं[37] च यत् ॥ ५७ ॥
तत् स्वरैर्द्वादशैर्भेद्य दीर्घाण्यङ्गानि कल्पयेत्[38]।
हृदयादीनि देवेश मूलं च दशमं कुरु ॥ ५८ ॥
यथा देहे तथा देवे[39] तत्त्वानि विनियोजयेत्।
ततो गन्धैश्च पुष्पश्च नैवेद्यैर्विविधैरपि ॥ ५९ ॥
लड्डुकैर्वटकैः पूपैर्घृतपूर्वैः सफाणितैः[अ]।
कृसरैः पायसैर्भक्तैर्नैवेद्यै[40] रर्चयेद्धरिम् ॥ ६० ॥
विविधैश्चाप्यलङ्कारैर्हेम[41]पुष्पैः समुज्ज्वलैः।
प्रवालपत्राभरणैर्हेमैः पद्मैः समुज्ज्वलैः ॥ ६१ ॥

[32] विद्युत्सप्रभम्—A.; विद्यत्समप्रभम्—F. विद्युता समम्—K. [33] हि समन्वितम्—A. [क] त्रिविक्रमम्—K. [34] तु वामतः—B, C., ततोऽन्यतः—K. [35] तु—B, C. [36] चरेत्—B, C. [37] तस्याद्यम् अक्षरं—B, C. [38] दीर्घाणि परिकल्पयेत्—B, K. [39] देवे तथा देहे—B. C. [अ] सफालितैः—Var. ed;. सफाणितैः—F., सुपाचितैः—K. [40] नैवेद्यं—B, C. नैवेद्यैर्दशये…var;. ed. K. [41] गन्ध—B, C.

प्रभूतैर्याज्ञिकैर्द्रव्यैर्देयं[42] चक्राब्जमण्डले ।
यजेत भक्तितो विष्णुं भोगमोक्षफलप्रदम् ॥ ६२ ॥
चन्दनागुरुकर्पूरै मृगदर्पैः ससर्जकैः ।
दद्यात् पञ्चविधं धूपं पुष्पं नानाविधं शुभम् ॥ ६३ ॥
समन्ताद्दीपमालाभिः शोभयेद् देवसत्तम ।
पूर्ववच्चासनं ध्यायेत् सपात्रं सपरिच्छदम् ॥ ६४ ॥
शुभं चक्रं द्वादशारमुपरिष्टाद् विचिन्तयेत् ।
त्रिनाभिचक्रं द्विनेमिं[43] सूक्ष्मं तत्त्व[44]समन्वितम् ॥ ६५ ॥
प्रधिदेशे ततः प्राज्ञः प्रकृत्यादीन् निवेशयेत्[45] ।
पूजयेदारकाग्रेषु सूर्यं द्वादशधा पुनः[46] ॥ ६६ ॥
कलाषोडशसंयुक्तं सोमं तत्र विचिन्तयेत् ।
दहनत्रितयं[47] नाभौ चिन्तयेद् देशिकोत्तम ॥ ६७ ॥
पद्मं च द्वादशदलमक्षमध्ये विचिन्तयेत् ।
तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्च्य तु देशिकः ॥ ६८ ॥
प्रतिमायां तु यो न्यस्तस्तत्र तं पूजयेत् सुधीः ।
गन्धपुष्पादिभिः सम्यक् साङ्गं साधारणं क्रमात् ॥ ६९ ॥
द्वादशाक्षरबीजैस्तु[48] केशवादीन् समर्चयेत् ।
आरकेष्वानुपूर्व्येण द्वादशारे तु[49] मण्डले ॥ ७० ॥
पश्चाद्[ट] यथोक्तविधिना लोकपालान्तरं[50] क्रमात् ।
प्रतिमामर्चयेत् पश्चात् गन्धपुष्पादिभिर्द्विजः ॥ ७१ ॥
पौरुषेण च[51] सूक्तेन प्रत्यृचं सुरसत्तम ।
श्रियाः[52] सूक्तेनार्चयीत प्रत्यृचं पिण्डिकामयम्[ठ] ॥ ७२ ॥

[42] यं omitted in A. [43] चक्रं द्विनेमिं—C. द्विनेमिः—K. [44] अक्ष—C. श्लक्ष्णं —K. [45] विचिन्तयेत्—B. [46] बुध—C. [47] त्रितये—C. सवनत्रितयं—K. [48] बीजस्तु —C. [ट] यष्टा—K. [49] द्वादशाक्षर—A. [50]···लादिकं—B, C. [51] तु—A. D. [ठ] कामपि —K. [52] श्रिया—A.

जननादिक्रमात् पश्चाज् जनयेत् वैष्णवानलम् ।
तत्क्रमं वर्णयिष्यामि दीक्षायां पुरुषोत्तम[53] ॥ ७३ ॥
हुत्वाग्निं वैष्णवैर्मन्त्रैः कुर्याच्छान्त्युदकं बुधः[54] ।
तत् सिक्त्वा प्रतिमामूर्ध्नि वह्निप्रणयनं कुरु ॥ ७४ ॥ (?)
दक्षिणे "ऽग्निं दूत" मिति कुण्डेऽग्निं प्रणयेद् बुधः ।
"अग्निमीडे" ति पूर्वे तु कुण्डे ऽग्निं प्रणयेद् बुधः* ॥ ७५ ॥
उत्तरे प्रणयेदग्निम् "अग्निमग्निस्तु[ङ] धीमहि" ।
अग्निप्रणयने मन्त्र "स्त्वमग्ने द्युभि" रुच्यते** ॥ ७६ ॥
पलाशसमिधानां तु घृताक्तानां महानले[ढ] ।
अष्टोत्तरसहस्रं तु कुण्डे कुण्डे च होमयेत् ॥ ७७ ॥
वेदादिमन्त्रैर्देवेश[55] ततो व्रीहींस्तु होमयेत् ।
तिलानां घृतयुक्तानां कुण्डे कुण्डे तु मूर्तिपाः ॥ ७८ ॥
सहस्रैकं व्याहृतिभिर्जुहुयूः साज्यमक्षतम्[ण] ।
मूलमन्त्रेण जुहुयूः स्वाहान्तेन सुरोत्तम ॥ ७९ ॥
अष्टोत्तरसहस्रं तु कुण्डे कुण्डे यथाविधि ।
घृतहोममिदं प्रोक्तं शान्तिहोममतः शृणु ॥ ८० ॥
मधुरत्रितयेनाथ जुहुयाद् द्वादशाक्षरैः ।
पादौ नाभिं हृच्छिरश्च स्पृशेद्धुत्वा[त] यथाक्रमम् ॥ ८१ ॥
घृतं दधि पयश्चैव मात्रिकं देशिकोत्तमः[56] ।
प्रतिलोमं स्पृशेच् चापि[57] हुत्वा तु मधुरत्रयम् ॥ ८२ ॥

[53] दीक्षापाते सुरोत्तम—A, D, E, F. दीक्षायां ते सुरोत्तम—K. [54] पुनः—B, C. [ङ] अग्निमग्नीन्तु—D. हवामहे—K. [ढ] महालये—Var. ed.; महावने—F. [55] देवेशं—B, C. * This line is omitted in F.; K reads अग्निमग्नीति पूर्वेति कुण्डेऽग्निं प्रणयेद् बुधः । ** "त्वमग्नेऽस्त्वि"ति पश्चिमे—B, D. [ण] साष्टमं शतम्—K. [त] हृच्छिरश्च स्थाने हुत्वा—F. [56] देशिकः स्वयं—C, D, K. [57] विशेच्चापि—A.; स्पृशेद् वापि—B. C.

शतमष्टोत्तरं हुत्वा विष्णु शिरसि संस्पृशेत् ।
तथैव हुत्वा पञ्चाशत् हृदये संस्पृशेद्धरिम् ॥ ८३ ॥
ततोऽष्टाविंशतिं हुत्वा[58] नाभिदेशे हरिं स्पृशेत् ।
अष्टावष्टौ ततो हुत्वा पादाङ्गुष्ठौ च[59] संस्पृशेत् ॥ ८४ ॥
यागमण्डपमासाद्य दक्षिणद्वार[60]गोचरे ।
उत्तराभिमुखाः स्थाप्याश्चत्वारो धेनवोऽनघ ॥ ८५ ॥
गङ्गेति प्रथमा ख्याता द्वितीया यमुनेति च ।
गोदावरी तृतीया च चतुर्थी च सरस्वती ॥ ८६ ॥
दोहनं विष्णुगायत्र्या कृत्वा पश्चाच् चरुं श्रपेत् ।
गायत्र्या होमयेच्चैव गायत्र्यैव बलिं हरेत् ॥ ८७ ॥
[नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥]*
भोजयेद् ब्राह्मणांश्चैव मण्डपादुत्तरे द्विज[61] ।
पायसेनाज्ययुक्तेन शर्करामिश्रितेन च ॥ ८८ ॥
मासाधिपानां तुष्ट्यर्थं दद्यात् कनकदक्षिणाम् ।
गाश्च तांस्तान् समुद्दिश्य एकैकाय[थ] निवेदयेत् ॥ ८९ ॥
देवासुरादीन्[द] उद्दिश्य कुर्याद् बलिनिवेदनम् ।
अधिवास्यैव देवेशं कुर्याज् जागरमादरात् ॥ ९० ॥
मङ्गलैर्ब्रह्मघोषैश्च जयशब्दरवैस्तथा ।
पुण्याहशब्दैर्विपुलैर्गीतवादित्रनिःस्वनैः ॥ ९१ ॥
शङ्खघोषेण महता वीणावेणुरवेण च
कोलाहलैश्च भेर्याद्यैः कुर्याज् जागरणं हरेः ॥ ९२ ॥
यस्त्वेवं विधिना भक्त्या कुर्याद्देवाधिवासनम् ।
स सर्वतीर्थयज्ञानां दानानां तपसां तथा ॥ ९३ ॥

[58] ···त्रिंशतिर्हुत्वा—C. [59] तु—B, C, D. [60] दक्षिणे धन—B, C. * [] Found in K only. [61] द्विजः—B, C. [थ] देशिकाय—K. [द] देवान् सुरानीद्—K.

फलं शतगुणं प्राप्य विष्णुलोके महीयते ।
आभूतसंप्लवं यावद् देववत् तत्र मोदते ॥ ६४ ॥

॥ ३७ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे सप्तत्रिंशः अधिवासपटलः ॥ ३७ ॥

अष्टत्रिंशः पटलः

श्रीभगवान् उवाच—

अधिवास्य[1] विधानेन देवदेवं हरिं प्रभुम् ।
पिण्डिकास्थापनार्थाय गर्भागारं विशेद् गुरुं ॥ १ ॥
वृत्तं वा चतुरस्रं वा आयतं चतुरस्रकम् ।
वृत्तायतं तु प्रासादं चतुर्विधमुदाहृतम् ॥ २ ॥
चतुरस्रायते गर्भे तथा[2] वृत्तायते द्विजः ।
स्थापयित्वा विधानेन सर्वलोकपितामहम् ॥ ३ ॥
निविष्टं यानगं वापि वृत्ते संस्थापयेद् बुधः ।
चतुरस्रे स्थापयीत स्थितं[3] साधारणं हि तत् ॥ ४ ॥
स्थानासनं तथा यानं चतुरस्रे स[4]वृत्तके ।
आयते शयनं कार्यं न स्थानं नासनं तथा ॥ ५ ॥
यादृशं गर्भगेहं[5] तु कृतं सुरगणार्चित[6] ।
सं[7]विभज्य प्रकुर्वीत सप्तभागं विचक्षणः ॥ ६ ॥

[1] अधिवास—A. [2] यथा—A, B. [3] सिंहं—A. [4] सु—B, C. [5] ···देहस्तु—A.
[6] ···णार्चितः—C. ···र्चितम् –K. [7] तं—B, C. K.

पुनश्च सप्तधा कृत्वा स्थानभागं प्रकल्पयेत् ।
ब्रह्मभागं भवेन्मध्यं[8] दैवं स्यात् तदनन्तरम् ॥ ७ ॥
तृतीयं मानुषं भागं पैशाच्यं च चतुर्थकम् ।
द्विभुजं ध्यानयोगस्थं निविष्टं स्थितमेव च[9] ॥ ८ ॥
चतुर्भुजं ब्राह्मणे तु[10] भागे संस्थापयेद्धरिम् ।
व्यक्ताव्यक्तं तथा व्यक्तं लिङ्गं ब्राह्मे तथा न्यसेत्* ॥ ९ ॥
स्वमूर्तिं ब्रह्मभागे तु व्योमं वाऽखण्डजन्मनः[11] ।
ब्रह्मभागं परित्यज्य किंचिदाश्रित्य वा द्विज ॥ १० ॥
सदैव स्थापयेद् देवं देवमानुषभागयोः ।
दैव[12]मानुषभागाभ्यां शयनं परिकल्पयेत् ॥ ११ ॥
दारवीं मृन्मयीं मूर्तिं देव[13]स्थाने निवेशयेत् ।
मानुषं किञ्चिदाश्रित्य आसीनं स्थापयेद्धरिम् ॥ १२ ॥
नरसिंहं वराहं च देव[14]भागे नियोजयेत् ।
विघ्नेशमम्बिकां देवीं मातृभूतगणं तथा ॥ १३ ॥
आदित्यादीन् ग्रहान् यक्षान्[15] एवमादींस्तथापरान् ।
पैशाचे स्थापयेत् स्थाने नात्र कार्या विचारणा ॥ १४ ॥
स्वस्थानवर्जिताः सर्वे भयदुःखामयप्रदाः ।
तस्मात् सर्वप्रयत्नेन[16] स्वे स्वे स्थाने[17] नियोजयेत्[18] ॥ १५ ॥
सर्वसाधारणं वक्ष्ये पिण्डिकास्थापनं तव ।
दैवमानुषभागाभ्यां[19] स्थाप्या यत्नाद्धि पिण्डिका ॥ १६ ॥
नपुंसकशिलायां तु रत्नन्यासं समारभेत् ।
वस्त्राभरणगन्धाद्यैः पूर्ववद्भूषितो गुरुः[20] ॥ १७ ॥

[8] भवेदेवं—C. [9] वा—B, C. [10] वा ब्राह्म तु—B, C. * ब्राह्मे निवेशयेत्—K. [11] This line and the line preceding it are omitted in A. and D. B, C. have this line mutilated. Our reading is from K. [12] देव—C. [13] दिव्यस्थाने—B, C. [14] दैव—B, C. [15] हरेद् रत्नान् B, C. [16] सर्वेन यत्नेन—A. [17] स्वस्थाने—B, C. [18] विनियोजयेत्—B, C. [19] भागाद्या—C. [20] भूषिते तव—C.

हुत्वाहुतिशतं विप्र नारसिंहेन वा पुनः।
तेनैवामन्त्र्य रत्नादीन् पिण्डिकाश्चभ्रके[21] न्यसेत् ॥ १८ ॥
वृत्तायते च प्रासादे यत्र तत्र च कारयेत्*।
गुग्गुलुं द्रावयित्वा तु गर्भेषु[22] विनिवेशयेत् ॥ १९ ॥
रत्नादीनां तु क्षिप्तानां निश्चलीकरणाय तु।
ततो निवेशयेत् तांस्तु दिशासु विदिशासु च ॥ २० ॥
प्रथमावरणे व्रीहीन् रत्नान्यपि द्वितीयके।
तृतीये विन्नसेद्धातून् लोहं चापि चतुर्थके ॥ २१ ॥
प्रतिवारणगर्भेषु[23] पञ्चमावरणे द्विजः।
चन्दनादींस्तु विप्रेन्द्र चाष्टौ[24] दिक्षु निवेशयेत् ॥ २२ ॥
एकैकं दिक्षु विन्यस्य मध्ये चैवापरं[25] न्यसेत्।
ऐन्द्र्यां च चन्दनं न्यस्य आग्नेय्यां रक्तचन्दनम् ॥ २३ ॥
कृष्णागुरुं दक्षिणस्यां नैर्ऋत्यामपरागुरुम्[26]।
उशीरं पञ्चमे भागे विष्णुक्रान्ता[27]मथापरे ॥ २४ ॥
सहदेवामुदीच्यां तु लक्ष्मणा[क] मीशगोचरे।
ब्राह्मीं सुवर्चला[28]मृद्धिं वृद्धिं ब्राह्मे निवेशयेत्[29] ॥ २५ ॥
धान्यमैन्द्र्यां निवेश्याथ आग्नेय्यां तु कुलत्थकम्[ख]।
यवान्[30] दक्षिणभागे तु गोधूमं नैर्ऋते न्यसेत् ॥ २६ ॥
तिलांस्तु पश्चिमे भागे[31] नीवारं वायुगोचरे।
मुद्गमुत्तरतो दद्यान् निष्पावान् ईशगोचरे ॥ २७ ॥
मध्ये सिद्धार्थकं दद्यात् रत्नन्यासं शृणुष्व मे[32]।
वज्रं तु[33] पूर्वतो दद्यादाग्नेय्यां मौक्तिकं न्यसेत्[34] ॥ २८ ॥

[21] शुभ्रके—C. * तत्र तत्र विचारयेत्—F. [22] गर्भे तु—A. गर्तेभ्यो—K. [23] ···गर्भे तु—A, [24] श्चाष्टौ—C. [25] ···परे—A, B. [26] दर्भमुत्तमम्—B, C. [27] ···क्रान्त—A. क लक्ष्मणा—A, B. C. [28] सुवर्चलां मध्ये—A, B. [29] निवेदयेत्—C. ख ···विन्यसेत् तथा —var. ed. [30] यवं—C. माषं—K. [31] दद्यात्—B, C, D. [32] समाचरेत्—A, D. [33] च—B, C. [34] तथा—A, D.

वैदूर्यं दक्षिणे दद्यात् शङ्खं निर्ऋतिगोचरे ।
स्फटिकं वारुणे दद्यात् पद्मरागं तु वायवे ॥ २९ ॥
उत्तरे चन्द्रकान्तं तु ऐशान्यामिन्द्रनीलकम् ।
पद्मरागं न्यसेन् मध्ये यथावद् द्विजसत्तम ॥ ३० ॥
हरितालं न्यसेत् पूर्वे आग्नेय्यां तु मनःशिलाम् ।
अञ्जनं दक्षिणे दद्यान् काक्षिकं ब्रह्मगोचरे ॥ ३१ ॥
सौराष्ट्री वारुणे देया वायव्यां गैरिकं तथा ।
कांस्यं चैवोत्तरे दद्यादैशान्यां गन्धकं तथा ॥ ३२ ॥
पारदं तु न्यसेत् मध्ये यथा वा त्रिदशेश्वर ।
हिरण्यं पूर्वतो दद्यादाग्नेय्यां तारमुत्तमम् ॥ ३३ ॥
आयसं दक्षिणे न्यस्य आग्नेय्यां[35] त्रपुषं[36] तथा ।
पश्चिमे विन्यसेद् व्योषमारं[37] वायव्यगोचरे ॥ ३४ ॥
सिह्लकं[38] चोत्तरे न्यस्य शुल्वमीशानगोचरे ।
पद्मं कूर्मं तथा शङ्खं[39] पृथ्वीमध्ये निवेशयेत् ॥ ३५ ॥
सुमेरुं च सुरश्रेष्ठ सर्वमेतद् हिरण्मयम् ।
एषामेकतमं मध्ये न्यसेत् सर्वाण्यथापि वा[40] ॥ ३६ ॥
"नमो हिरण्य" मन्त्रेण ब्रह्मस्थाने निवेशयेत् ।
नराणां मूर्तिमन्त्राणां मन्त्रैरेतन्निवेशयेत् ॥ ३७ ॥
पुण्डरीकाक्षमन्त्रेण गायत्र्या वा निवेशयेत् ।
अथवा मूलमन्त्रेण मन्त्रेणाष्टाक्षरेण वा ॥ ३८ ॥
दिगीशानां[41] तु मन्त्रेण रत्नादीन् विनिवेशयेत् ।

तद् यथा—

"(ॐ)[42] शक्रः सुरपतिः श्रीमान् सहस्रनयनोज्ज्वलः ॥ ३९ ॥

[35] नैर्ऋत्यां—C, F. [36] त्रपुकं—A, C. [37] नारं—C. ···विन्यसेद्योधियारं—F. [38] सीसकं—B, C, F. K. [39] सूक्ष्मं—A. [40] च –B, C. [41] दिगीशानं—A [42] ॐ is omitted in A.

यष्टा यः क्रतुमुख्यानां नमस्तस्मै महात्मने ।"
"ॐ त्रातार"मिति मन्त्रेण सान्निध्यं तत्र[43] कारयेत् ॥ ४० ॥
"अज[44]पृष्ठगतः शक्तिर्यस्य हस्ते महात्मनः ।
हव्यकव्यवहो यो वै नमस्तस्मै महात्मने" ॥ ४१ ॥
"ॐ अग्न आयाहि" मन्त्रेण सान्निध्यं तत्र कारयेत् ।
"ॐ कृष्णाञ्जननिभो रौद्रो दण्डपाणिः स्रगुज्ज्वलः ॥ ४२ ॥
सर्व[45]प्रेताधिपो देवो नमस्तस्मै महात्मने ।
सान्निध्यकरणे[46] तस्य मन्त्र "स्त्वसि यः" स्मृतः ॥ ४३ ॥
"ॐ घोरदंष्ट्राकरालस्तु खड्गपाणिः सुभैरवः[47] ।
रात्रसाधिपतिर्देवो नमस्तस्मै महात्मने" ॥ ४४ ॥
सान्निध्यार्थं तस्य[48] मन्त्रः "एष ते निर्ऋते" स्मृतः ।
"सप्तसागरदेहस्तु पाशपाणिर्महाद्युतिः ॥ ४५ ॥
यादसां पतिरेको यो[49] नमस्तस्मै महात्मने ।"
तस्यावाहन[50]मन्त्रस्तु[51] "पञ्चनद्यः सरस्वती" ॥ ४६ ॥
(ॐ) "सप्तस्वरानुगा यस्य योऽनुगीतो[52] मनीषिभिः ।
अशरीरेति विख्यातो नमस्तस्मै महात्मने" ॥ ४७ ॥
मन्त्रस्तस्यापि सान्निध्ये[53] "वात आ वातु भेषजम्" ।
"धनाधिपो ह्रस्वमूर्तिर्गदाहस्तो नृवाहनः ॥ ४८ ॥
उत्तराशाधीशः* श्रीमान् नमस्तस्मै महात्मने" ।
"सोमं राजे" ति मन्त्रोऽयं तस्य सान्निध्यकारकः ॥ ४९ ॥
"विद्याधिपो वृषारूढः शूलपाणिर्महाबलः ।
त्रैलोक्यवन्दितः श्रीमात् नमस्तस्मै महात्मने" ॥ ५० ॥

[43] तस्य —C. [44] अजा —B, C. अजापृष्ठगतः शक्तिपाणिर्देवनमस्कृतः—K. [45] सर्प—A. [46] सान्निध्यमगमत्—B, C. [47] सुरेश्वर—B, C. घोरदंष्ट्राकरालास्यः खड्गहस्तः सुभैरवः—K. [48] सान्निध्यकरणे—B, C. [49] वा—A. [50] स्यालभन—A. [51] मन्त्रश्च —C. [52] निगीतो—A ; निर्गीतो—F. [53] सान्निध्यं—C. * उत्तराशाधिपः—F.

"ईशा वास्ये" ति मत्रेण तत्सान्निध्यं प्रकल्पयेत्[54] ।
"य इमां सकलां पृथ्वीं शैलसागरभूषिताम् ॥ ५१ ॥
बिभर्ति नाना[55]प्रतिमां नमस्तस्मै महात्मने ।"
"नमोऽस्तु सर्प" मन्त्रेण सान्निध्यं तस्य कारयेद्[56] ॥ ५२ ॥
"ॐ ब्रह्मा चतुर्मुखः स्वामी सर्वलोकपितामहः ।
कमण्डलुधरः श्रीमान् तस्मै नित्यं नमो नमः"[57] ॥ ५३ ॥
"ब्रह्मा देवे"ति मन्त्रेण सान्निध्यं तस्य कल्पयेत्[58] ।
रत्न[59]न्यासमिमं कृत्वा गायत्र्यालभनं स्मृतम् ॥ ५४ ॥
छादयेन्नेत्रपट्टेन गन्धाद्यैरधिवासयेत् ।
ओषधीनामलाभे तु विष्णुक्रान्ता विशिष्यते[ग] ॥ ५५ ॥
बीजानामप्यलाभे तु यवं सर्वत्र दापयेत् ।
अलाभे सर्वरत्नानां[60] मुक्ता सर्वत्र शस्यते ॥ ५६ ॥
अलाभे सर्वरत्नानां हरितालं विनिक्षिपेत् ।
अलाभे सर्वलोहानां[61] काञ्चनानि प्रदापयेत् ॥ ५७ ॥
रत्नन्यासमिमं कृत्वा नपुंसकशिलातले ।
न्यसेत् पादशिलां तत्र स्त्रीलिङ्गै[घ]रुपलक्षिताम् ॥ ५८ ॥
ततः[62] संपूजयेत् विद्वान् पिण्डिकां शक्तिरूपिणीम् ।
महारङ्गे[63]न वस्त्रेण छाद्य गन्धादिनार्चयेत् ॥ ५९ ॥
पुष्पैर्मूलैः फलैर्हृद्यैः सितया चार्द्रकेण च ।
अभ्यर्च्य विन्यसेद् विद्वान् लक्ष्मीबीजं समाहितः ॥ ६० ॥
कृत्वैवं पिण्डिकाकर्म तदूर्ध्वं प्रतिमां[64] न्यसेत् ।
प्रासादानां तु सर्वेषां प्रतिमा जीव उच्यते ॥ ६१ ॥

[54] प्रकम्पयेत्—A, B ; सान्निध्यं तस्य कारकः—C. [55] विभक्तिमाला—A ; विभर्ति माला —K. [56] कल्पयेत्—A. [57] नमस्तस्मै महात्मने—B, C. [58] कारयेत्—C. [59] मन्त्र—A. [ग] विष्णुक्रान्तां विशांपते—All others except K. [60] सर्वधातूनां—A, C. [61] सर्वलौहानां —B, C. [घ] स्फुलिङ्गै—K. [62] तत्र—B, C. [63] मह—A, B. [64] प्रतिमा—A.

प्रतिमानां तु सर्वासां पादपीठः शिलामयः ।
तस्मात् सर्वप्रयत्नेन पीठोर्ध्वं[65] प्रतिमां न्यसेत् ॥ ६२ ॥
॥ ३८ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे अष्टत्रिंशः रत्नन्यासपटलः ॥ ३८ ॥

एकोनचत्वारिंशत्तमः पटलः

श्रीभगवान् उवाच—

रत्नन्यासविधिं कृत्वा प्रतिष्ठा[1]मारभेत् गुरुः ।
सशलाकैर्दर्भपुञ्जैः सहदेवासमन्वितैः ॥ १ ॥
सहाक्षतैस्तु सत्कृत्य गन्धगव्येन शोधयेत् ।
प्रोक्षयेद् गन्धतोयेन नदीतीर्थोदकेन च ॥ २ ॥
होमार्थं[2] स्थण्डिलं कुर्यात् सिकताभिः समन्ततः ।
सार्धहस्तप्रमाणं तु चतुरस्रं सुशोभनम् ॥ ३ ॥
अष्टदिक्षु यथान्यायं कलसानपि पूजयेत् ।
मन्त्रेणाष्टाक्षरेणैव पूर्वादिक्रमयोगतः ॥ ४ ॥
आनीय[3] संस्कृतं वह्निं "त्वमग्ने व्रतपे"[क] त्यृचा ।
पलाशसमिधानां तु घृताक्तानां सुरेश्वर ॥ ५ ॥
शतं वाथ सहस्रं वा गायत्र्या विष्णुसंज्ञया ।
जुहुयाच् च शतं पश्चादाज्यमष्टाक्षरेण च[4] ॥ ६ ॥
पूर्णाहुतिं शान्तितोयं कुर्यात् तत्र विचक्षणः ।
कलसेषूदकं गृह्य ताम्रपात्रे निवेशयेत् ॥ ७ ॥

[65] पीठोर्ध्व—omitted in A, B. [1] प्रतिमा—A. [2] होमार्थं—A, D. [3] आनीयं—A. [क] व्रतपतेतृचया—D. [4] तु—B, C.

मन्त्रयेे[5]च्छतवारांस्तु मूलमन्त्रेण देशिकः ।
सेचयेद् देवतामूर्धि "श्रीश्च ते" ऽत्यनयानघ ॥ ८ ॥
ब्रह्मयानेन चोद्धृत्य "उत्तिष्ठ ब्रह्मणस्पते" ।
"तद्[6] विष्णो" रिति मन्त्रेण प्रासादाभिमुखं नयेत् ॥ ९ ॥
शिविकायां हरिं स्थाप्य रथे वाथ सुयन्त्रितम्[7] ।
भ्रामयीत पुरं सर्वमथवायतनं स्वकम् ॥ १० ॥
प्रदक्षिणेन देवेशं सर्वशोभासमन्वितम् ।
ततो मङ्गलघोषैश्च गीतै[8]र्मधुरनिःस्वनैः ॥ ११ ॥
स्तुवद्भिर्मागधैः सूतैर्वाद्यैर्नानाविधैः शुभैः ।
गायद्भिर्ब्राह्मणैः साम सङ्घाकारेण सर्वशः ॥ १२ ॥
पताकाभिर्विचित्राभिर्ध्वजैर्नानाविधैः शुभैः[9] ।
देवदेवं महाभागं हरिं सर्वजगद्गुरुम् ॥ १३ ॥
संसारार्णवसन्तारपोतभूतं सुरेश्वरम् ।
कर्तृणां स्थापतीनां च शिल्पिनां पुरवासिनाम् ॥ १४ ॥
स्थापकानां च भृत्यानां पावनं पुण्यवर्धनम्[10] ।
भ्राम्य स्वायतनद्वारि मुखं कृत्वा निवेशयेत् ॥ १५ ॥
शिविकायां[ख] तु संस्थाप्य स्नपयेन्मङ्गलान्वितम् ।
चतस्रोऽविधवास्तत्र दिव्यमन्त्रादिपिण्डिताः[11] ॥ १६ ॥
सव्यापसव्यसूत्रेण वेष्ट्य स्पृश्य कुशेन[12] तु ।
आचार्येणाभ्यनुज्ञाता घटैर्मलयरूषितैः[13] ॥ १७ ॥
स्न[14]पयन्ति हरिं भक्त्या अष्टमङ्गलसंयुतम् ।
ततो गन्धादिनाभ्यर्च्य मलमन्त्रेण देशिकः ॥ १८ ॥

[5] अर्चयेच्—B, C. [6] त्वं—B, C, D. [7] सुमन्त्रितम्—B, C. [8] मङ्गलैर्वेदघोषैश्च सर्वैः—B, C. [9] ...स्तथा—B, C.; K. [10] पावकं पुण्यवर्धकम्—A. [ख] एककायां तु—D; एडकायां तु—F. एरकायां तु—K. [11] मण्डिताः—B, C.; K. [12] कुलेन—A. सूत्राणावेष्ट्या-स्पृश्य—K. [13] भूषितैः—B, C. मङ्गलभूषितैः—K. [14] स्ना—C.

शुक्लवस्त्रेण संछाद्य अष्टाङ्गार्घ्यं निवेदयेत् ।
पात्रेण[15] यन्त्रितं कृत्वा "अतो देवे"ति चालयेत् ॥ १९ ॥
अद्वार[16]बन्धे प्रासादे द्वारेणैव प्रवेशयेत् ।
द्वारबन्धे कृते दैवे[17] आकाशेन प्रवेशयेत् ॥ २० ॥
द्वारबन्धे कृते वापि[18] अस्पृश्यंस्तं प्रवेशयेत् ।
"देवस्य त्वे"ति मन्त्रेण तिर्यगूर्ध्वमधस्तथा ॥ २१ ॥
पिण्डिकोर्ध्वं ततो देवं मन्त्रितं धारयेत् क्षणम् ।
ततः शङ्खघटीतोयैर्दैवज्ञो लग्नमादिशेत्[19] ॥ २२ ॥
ज्ञात्वा सम्यक्स्थिरं[20]लग्नं मन्त्रं वा निवेशयेत्[21] ।
पिण्डिकायां सुरश्रेष्ठ मन्त्रेणानेन देशिकः ॥ २३ ॥
॥ ० ॥ "ॐ त्रैलोक्यविक्रान्ताय[22] त्रिविक्रमाय नमो नमः" इति ॥ ० ॥
संस्थाप्य पिण्डिकायां तु स्थिरं कुर्याद् विचक्षणः ।
"ध्रुवा द्यौ" रितिमन्त्रेण "विश्वतश्चक्षु" रित्यपि ॥ २४ ॥
पञ्चगव्येन तु तं स्नाप्य क्षाल्य गन्धोदकेन तु ।
पूजयेत् सकलीकृत्य साङ्गं सावरणं हरिम् ॥ २५ ॥
ध्यायेत् तं परमात्मानं निष्कलं निर्मलं विभुम् ।
गगनं तस्य मूर्तिस्तु[23] पृथिवी तस्य पिण्डिका[24] ॥ २६ ॥
कल्पयेद् विग्रहं तस्य तैजसैः परमाणुभिः ।
तेजोमयं ततो ध्यायेत् शङ्खचक्रगदाधरम् ॥ २७ ॥
मन्त्रमूर्तिं[25] ततः कुर्यान्मूलमन्त्रेण वै हरेः ।
स्थिते विभौ[26] स्थितिन्यासमासीने सृष्टिसंज्ञितम् ॥ २८ ॥
शायिते संहृतिन्यासं यानस्थे सर्वमेव च ।
एवं न्यासविधिं कृत्वा ध्यायेद् विष्णुं सुरेश्वरम् ॥ २९ ॥

[15] यन्त्रेण—B, C. K. [16] सद्वारबन्धे—B, C. [17] कृता देव—B, C.; कृते देवम्—D, F. K. [18] चापि—B, C. [19] दैवज्ञान् लग्नमाविशेत्—A. [20] स्थितं—A. [21] निवेदयेत्—A. [22] विक्रमाय—B, C. [23] मूर्तिं तु—B. मूर्ध्निस्थं—C. [24] पीठका—C. K. [25] मन्त्रमूर्तिं—A, B. [26] विष्णौ—B.

कृत्वा चामरमध्यस्थं सर्वकर्मैकसाक्षिणम् ।
क्षेत्रज्ञचित्स्वभावं तमणीयांसमणोरपि ॥ ३० ॥
अदोषं परमानन्दं[ग] प्रतिमायां निवेशयेत्[27] ।
सजीवकरणं कृत्वा प्रणवेन निबोधयेत् ॥ ३१ ॥
सान्निध्यकरणार्थाय हृदयं स्पृश्य देशिकः ।
पौरुषं तु जपेत् सूक्तं ध्यायेद् देवं सुरेश्वरम्[28] ॥ ३२ ॥
जपेत् तथापरं मन्त्रमिमं गुह्यं सनातनम् ।
"ॐ नमस्तुभ्यं[29]सुरेशाय सन्तोषविभवात्मने ॥ ३३ ॥
ज्ञानविज्ञानरूपाय ब्रह्मतेजोऽनुयायिने ।[30]
गुणानुक्रान्त[31]वेशाय पुरुषाय महात्मने ॥ ३४ ॥
अक्षयाय पुराणाय विष्णो सन्निहितो भव ।
यच्च ते परमं तत्त्वं यच्च ज्ञानमयं वपुः ॥ ३५ ॥
तत् सर्वमेकतो लीनमस्मिन् देहे विबुध्यताम् ।"
अनेन सन्निधीकृत्य देवं देवारिसूदनम् ॥ ३६ ॥
ब्रह्मादिपरिवारांस्तु स्वनाम्ना स्थापयेत् पृथक् ।
आयुधान्यस्य मन्त्रैस्तु नमोऽन्तैः स्थापयेद् बुधः[32] ॥ ३७ ॥
ततः[33] संदर्शयेत् पश्चात् स्वकां मुद्रां पृथक् पृथक् ।
सान्निध्यं तु पुनः कुर्यात् प्रणवेन प्लुतेन च[34] ॥ ३८ ॥
तस्मिन्नेव मुहूर्ते तु हर्षो वा भयमेव च ।
चक्षुर्भ्रमो विभ्रमो वा त्रासो वा जायते यदि ॥ ३९ ॥
व्यामोहः परमो वाथ[35] स्तनितं परमं तथा ।
अश्रुतानाश्रुतो वा स्याद् गात्राणां वाथ वेपथुः ॥ ४० ॥

[ग] अदोषरगेर्ष्यादीन्—D ; आदाय परमेष्ठ्यादीन्—Ver. ed. K. [27] निवेदयेत्—A. [28] सुरोत्तमम्—B, C. [29] नमस्तेऽस्तु—C. [30] This line is omitted in C.; ब्रह्मतेजोशालिने—F. [31] गुणानुत्क्रान्त—C. [32] गुरु—B, C. [33] स्थाप्य—B, C. [34] तु—A. K. [35] परमोहो वा—A, D.

वैराग्यं नेत्रयोर्वा स्याद् दर्पः कन्दर्प एव च।
परमो विस्मयो वाथ दिव्यो वा श्रूयते ध्वनिः ॥ ४१ ॥
दिव्यवादित्रघोषो वा गन्धर्वनगरस्य वा।
दर्शनं जायते काले तस्मिन् सुरगणार्चिते[36] ॥ ४२ ॥
नरा नार्योऽथ दृश्यन्ते गायन्तोऽप्यथ हर्षिताः[37]।
नन्दितूर्यरवो[38] वापि श्रूयते छन्दसां ध्वनिः ॥ ४३ ॥
दिव्यगन्धरसा वापि एकस्यापि भवन्ति हि।
लिङ्गैरेतैर्विजानीयात् तस्मिन् सन्निहितं हरिम् ॥ ४४ ॥
प्रभा चैव विशेषेण ज्वलन्तीव च दृश्यते।
स्फुरन्तीव च दृश्येत प्रतिमा च विशेषतः ॥ ४५ ॥
स्फुरन्निव जनः कश्चित् स्मयमान इव क्वचित्।
वीक्षमाणो जनस्तत्र प्रहृष्ट इव लक्ष्यते ॥ ४६ ॥
एतैस्तु लक्षणैर्ज्ञेयस्तत्र सन्निहितो हरिः।
विशेषादथवा पश्येच्छक्रचापोपमं क्वचित् ॥ ४७ ॥
छविं[39] वज्रप्रभां पश्येत् पद्मरागप्रभां तथा[40]।
सौदामिनीप्रभां पश्येत् प्रतिमायां क्वचिद् यदि[41] ॥ ४८ ॥
एतैर्लिङ्गैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः।
बधिरा इव केचित् तु मूका इव तथापरे ॥ ४९ ॥
विभ्रान्ता इव केचिच् च जडा इव तथापरे।
धावन्त इव केचित् तु पतन्त[42] इव चापरे ॥ ५० ॥
नृत्यन्त इव चाप्यन्ये मत्ता इव तथा यदि।
चित्रस्था इव केचित् तु विवशा इव केचन ॥ ५१ ॥
भवन्ति तत्र चोन्मत्ताः प्रमत्ता इव चापरे।
लिङ्गैरेतैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ॥ ५२ ॥

[36] ···चिते—A. [37] भूषिताः—B, C. [38] नन्दितूर्यरवो—omitted in A, B. [39] छविं—omitted in A, B. [40] यथा—A, B. [41] B, C. omit this line. [42] वपन्त—B, C.

एवं यथावद् विधिना[43] कृत्वा सन्निहितं हरिम् ।[44]
कृत्वाष्टाङ्गनमस्कारं प्रणम्याञ्जलिमुद्रया ॥ ५३ ॥
सान्निध्यकरणाच्चाथ ऋत्विग्भिः सहितो गुरुः ।
स्तूयादुपनिषन्मन्त्रैर्ऋग्यजुःसामसम्भवैः ॥ ५४ ॥
आरण्यकं पठेत् सर्वं पञ्चोपनिषदस्तथा ।
स्तुत्वा स्तोत्रैस्तु पौराणैर्जपेदष्टाक्षरं ततः ॥ ५५ ॥
जप्त्वाष्टाक्षरमन्त्रं तु निर्गत्य द्वारसंस्थितः ।
चण्डप्रचण्डौ द्वारस्थौ निर्गम्याभ्यर्चयेद् गुरुः ॥ ५६ ॥
अग्र[45]मण्डपमासाद्य गरुडं स्थाप्य पूजयेत् ।
दिगीशानथ दिग्देशान्[46] स्थाप्य संपूज्य देशिकः ॥ ५७ ॥
विष्वक्सेनं तु संस्थाप्य मूलमन्त्रेण पूजयेत् ।
तथा शङ्खं च चक्रं च पूजयेन् मन्त्रवित्तमः ॥ ५८ ॥
विष्णुं च पार्श्वदेवांश्च[घ] सर्वेभ्यो बलिमाहरेत् ।
एवं कृत्वा गुरुः सम्यक् शुक्लाम्बरधरः शुचिः ॥ ५९ ॥
शतमष्टोत्तरं जप्त्वा देवं तमभिवादयेत् ।
प्रणाममुद्रया पश्चादष्टाङ्गं प्रणिपत्य च ॥ ६० ॥
नृत्यं वाद्यं च गेयं च नाट्यं चापि प्रकाशयेत् ।[47]
मण्डले कमले वापि स्थापयित्वा गुरुं यजेत् ॥ ६१ ॥
प्रियप्रश्नैः क्षमाप्यैनं विष्णुवत् पूजयेद् बुधः ।
पादयोः प्रणिपत्याथ[48] दक्षिणां च निवेदयेत् ॥ ६२ ॥
आचार्यदक्षिणां दद्यान् नगरं ग्राममेव च ।
सुवर्णं रजतं वस्त्रं गाश्चैव समलंकृताः ॥ ६३ ॥

[43] बोधेन—C, D. [44] A omits this line. [45] अथ—B, C. [46] देवेशान्—B, C.; दिग्देवान्—D. दिगीशान् दिशि देवांश्च—K; [घ] विष्णुपरिषदेभ्यश्च—K. [47] उल्लासं चापि कारयेत्—B, C. [48] प्रणिपत्याह—A, B,; प्रणिपत्य वै—C.

दक्षिणां विधिवद् दत्त्वा दद्यादाभरणादिकम् ।
यागोपयोगद्रव्याणि सर्वाण्यस्मै निवेदयेत् ॥ ६४ ॥
स्नानीयमण्डपोपेतं सर्वोपस्करणादिकम् ।[49]
मूलयज्ञगृहं दद्यादाचार्याय तथा परम् ॥ ६५ ॥
आचार्यदक्षिणार्थं तु प्रदद्याद् ब्रह्मदक्षिणाम् ।
मूर्तिपान् पूजयेत् पश्चाद्गोवस्त्राभरणैर्द्विज ॥ ६६ ॥
सर्वांस्तु पूजयेत् तत्र वैष्णवानागतान् द्विजान् ।
भोजयेद् ब्राह्मणान् पश्चादव्यापारमतन्द्रितः[घ] ॥ ६७ ॥
प्राङ्मुखं यजमानं तु स्थापयित्वा यथाविधि ।
फलं समर्पयेत् तस्मै परितुष्टमना गुरुः ॥ ६८ ॥
यज्ञः सुपुष्कलः सर्वैः कर्तव्यो धर्मलिप्सया ।
मन्त्रहीनो गुरुं हन्याद् राष्ट्रमन्नेन वर्जितः ॥ ६९ ॥
धर्मं च यजमानं च हन्याद् दक्षिणया विना ।
अयं साधारणः प्रोक्तः प्रतिष्ठापञ्चको मया ॥ ७० ॥
सर्वेषामेव देवानामेष साधारणः स्मृतः ।[50]
यो विष्णुं स्थापयेद् देवं सर्वलोकनमस्कृतम् ॥ ७१ ॥
स्थापितं तेन सर्वं स्याज् जगत् स्थावरजङ्गमम् ।
अतीतान् दशपूर्वांस्तु तथैवानागतान् दश ॥ ७२ ॥
आत्मानं सपरीवारं विष्णुलोकं नयेन्नरः ।
कोटिजन्मगतं[51] पापं स्वल्पकं यदि वा गुरु[52] ॥ ७३ ॥
तत्सर्वं भस्मसात् कुर्यात् संस्थाप्य मधुघातिनम् ।
— — — — — — — — ॥ ७४ ॥

॥ ३९ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे एकोनचत्वारिंशत्तमः प्रतिष्ठापटलः ॥ ३९ ॥

[49] C. here repeats the first hemistich of verse 62. [घ] मतान्वित—Var. ed. [50] this line is omitted in B, C. [51] " जन्मकृतं—C. [52] बहु—C.

चत्वारिंशत्तमः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि यज्ञस्यावभृथं[1] तव ।
शोधयेद् गोमयैर्विप्र यागस्थानं तु सर्वतः ॥ १ ॥
सिक्त्वा गन्धोदकेनाथ गव्यगव्येन शोधयेत् ।
विकिरैः[2] शोधयेद् भूमिं वितानेन विभूषयेत् ॥ २ ॥
पुष्पदामैरधश्चोर्ध्वं पार्श्वतश्चापि शोधयेत् ।
जुहुयाद् वैष्णवे वह्नौ घृतमष्टोत्तरं शतम् ॥ ३ ॥
"विष्णोर्नुकि" (?)* ति मन्त्रेण समिधोऽष्टशतं तथा ।
वेद्यामालिख्य विधिना एकाशीतिघटान्[3] बुधः ॥ ४ ॥
वैष्णवं कलसं मध्ये "आजिघ्रे" ति निवेशयेत् ।
एकाशीतिपदे कुम्भान् श्रीसूक्तेन निवेशयेत् ॥ ५ ॥
"शन्नो देवी" ति मन्त्रेण कलसानभिमन्त्रयेत् ।
कलसे विन्यसेत् पञ्चगव्यं मन्त्रैर्विशेषतः ॥ ६ ॥
फलं पुष्पं[4] न्यसेत् तत्र[5] द्राक्षितं कदलीजलम् ।
मन्त्रयीत द्वयञ्चैतद् "याः फलिनी"ति सत्तम ॥ ७ ॥
ऐक्षवं च रसं विद्वान् "या दिव्ये"ति निवेशयेत् ।
गन्धतोयं[6] न्यसेन्मध्ये नवकानां सुरोत्तम ॥ ८ ॥
"तवत् समे" तृयचा[7] विद्वान् वस्त्रपूतं समाहितः ।
नदीनदतडागोत्थैः शेषांस्तोयैः प्रपूरयेत् ॥ ९ ॥
अपराजितमन्त्रेण सर्वानेवाभिमन्त्रयेत् ।
नवेन शुक्लवस्त्रेण सर्वानेवाभिवेष्टयेत् ॥ १० ॥

[1] ···मृत—A, B, C, D, E, F. [2] विविधैः—C. *विष्णोर्नुगिति—E, F, [3] ···पटान्—B, C; ···पदं—D. [4] तोयं—B, C, E, F, [5] विप्र—B, C. [6] मन्त्रतोयं—A. [7] This line is mutilated. C. starts with विद्वान् while A, B. have इतृयचा before it. तवत् इतृयचा—D.

गायत्रीं वैष्णवीं जप्त्वा मूलमन्त्रशतं जपेत् ।
जप्त्वा ध्यायन् हरिं सम्यक् प्रविश्याभ्यन्तरं शुचिः ॥ ११ ॥
"कृष्णोऽसी"ति च निर्माल्यं विष्वक्सेनाय निक्षिपेत् ।
अर्घ्यं दत्त्वा शुद्धवत्या शुद्धतोयेन सेचयेत् ॥ १२ ॥
"अग्निर्मूर्धे" त्युष्णजलैः स्थाप्य[8] स्नानं समारभेत्[9] ।
गोमूत्रेण हरिं स्नाप्य गोमयेन विलेपयेत् ॥ १३ ॥
क्षीरेण स्नापयेत् पश्चात् दध्ना च[10] तदनन्तरम् ।
घृतेन स्नाप्य विधिना धूपं दद्यात् तु गुग्गुलुम्[11] ॥ १४ ॥
प्रक्षाल्य को[12]ष्णतोयेन फलतोयेन सेचयेत् ।
स्नापयेत् कदलीतोयैस्ततस्त्विक्षुरसेन च ॥ १५ ॥
यैर्मन्त्रैर्मन्त्रयेत् तोयं तैर्मन्त्रैः स्नपयेद्धरिम् ।
"पञ्चनद्ये"तृचया पश्चान्नदीनदतडागजैः[13] ॥ १६ ॥
स्ना[14]पयित्वा विधानेन वस्त्रयुग्ममुपाहरेत् ।
कार्पासं पट्टसूत्रं वा कौषेयं वाथ भूषितम्[15] ॥ १७ ॥
"बृहस्पते"ति मन्त्रेण परिधाप्यार्चयेत् क्रमात् ।
गन्धादिभिः समभ्यर्च्य पार्षदान् पूजयेत् ततः ॥ १८ ॥
निवेदयीत नैवेद्यं भोज्यं भक्ष्यं सुपुष्कलम्[16] ।
पेयं चोष्यं तथा लेह्यं प्रभूतं द्विजसत्तम ॥ १९ ॥
बलिं विनिक्षिपेत् पश्चाद् दिशासु विदिशासु च ।
"ॐ नमः पार्षदादिभ्यो"[17]ऽथ बलिं पीठे विनिक्षिपेत् ॥ २० ॥
ततः प्रदक्षिणीकृत्य मण्डलं[18] ब्राह्मणेन तु ।
प्रविश्य भवनं भूयः स[19]र्वमारण्यकं पठेत् ॥ २१ ॥

[8] स्नाप्यं—A, B. [9] निवेशयेत्—C. [10] दधिना—A, D. [11] सगुग्गुलुम्—B, C. [12] चोष्ण—B, C. [13] ··· तथागतैः—A. [14] स्ना—B, C. [15] वा विभूषितम्—B.; वा विभूषयेत्—C. [16] सुपेशलम्—B, C. [17] पारिषदेभ्यो—B, C.; ··· पार्षदेभ्योऽथ—D.; पार्शदेभ्यो बलिं—F. [18] मण्डल—A, D, [19] पर्व—A.

पौराणैश्च स्तवैः स्तुत्वा महापुरुषपूर्वकैः ।
दण्डवत् प्रणमेत् पश्चात् नृत्यगीतादि कारयेत् ॥ २२ ॥
दद्यात् सुवर्णं गां वस्त्रं दक्षिणां देशिकाय तु ।
वैष्णवान् पूज्य शक्त्या तु ब्राह्मणेभ्यश्च दक्षिणाम् ॥ २३ ॥
आचार्यं तोष्य यत्नेन सन्ध्यायां बलिमाहरेत् ।
— — — — — — — — ॥ २४ ॥

॥ ४० ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे चत्वारिंशत्तमः अवभृथ*स्नानपटलः ॥ ४० ॥

एकचत्वारिंशत्तमः पटलः

श्रीभगवान् उवाच—

अतःपरं[1] प्रवक्ष्यामि विस्तरं बलिकर्मणाम् ।
संपाद्य वैष्णवे वह्नौ क्रमादन्नं चतुर्विधम् ॥ १ ॥
सोपदंशं[2] घृतेनाक्तं कृतं वा लौकिकेऽनले[3] ।
भूमौ मण्डलिकं[4] कृत्वा प्रोक्ष्य बर्हिः प्रकल्पयेत्[5] ॥ २ ॥
स्थानं[a] ताम्रमयं तत्र समानीय निवेशयेत् ।
तस्मिन् प्रकल्पयेत् पीठं हविषा[b] विधिना सुधीः ॥ ३ ॥
परमेष्ठ्यात्मिकां[c] शक्तिं तन्मध्ये विन्यसेत् ततः[6] ।
दीक्षाभिः पुरुषाभिश्च चतुर्भिर्बलिसंयुताम्[7] ॥ ४ ॥

*mss. read अवभृत ।

[1] तथा—A.; यथापूर्वं—F. [2] सापदंशं—A, B. [3] ···न तु—B. [4] च मण्डलं—B, C भूमौ मण्डलिकां—F. [5] प्रकीर्णयेत्—B, C. [a] खनिं—F.; थानं—E. [b] अनेन—F [c] ···त्मिकीं—D, F. [6] बुधः—B, C. [7] This line is omitted in A, B.; दीक्षाभिर-पुरुष्याभिश्चतुर्भिरभिसंयुताम्—D.; दिक्स्थाभिः पुरुषाख्याभिश्चतुर्भिरभिसंयुताम्—F.

तन्मध्ये स्थापयेद् गर्भ[8] चक्रं वाथ[ख] सुदर्शनम् ।
दीक्षितस्य द्विजातेस्तु[ग] तत्पात्रं शिरसि न्यसेत् ॥ ५ ॥
शेषमन्नं तु संगृह्य दद्याद्[घ]न्योन्यभाजने ।
घण्टां च सूपपात्रं च गृह्यान्यस्तत्र गच्छति[ङ] ॥ ६ ॥
सुमनोभिर्जलैर्युक्तं पात्रं गृह्यापरो[9]व्रजेत् ।
चन्द्रांशुविमलं छत्रं धारयेदपरः शुचिः ॥ ७ ॥
मृदङ्गभेरीपटह[10]काहलाशङ्खनिःस्वनैः ।
नर्तकैर्गायकैश्चैव वंशवाद्यैर्मनोहरैः ॥ ८ ॥
चामरासक्तहस्ताभिर्दिव्यस्त्रीभिर्विशेषतः ।
पताकाभिर्विचित्राभिर्वितानैर्विविधैस्तथा ॥ ९ ॥
निर्गच्छेद् देशिकस्तत्र यावद् द्वारं समाहितः ।
प्राप्य द्वारं द्वारपालौ पूजयित्वाऽथ[च] धूपयेत् ॥ १० ॥
प्रक्षिपेच्च बलिं तत्र ध्यात्वानन्तं सुरेश्वरम्[11] ।
वैनतेयं विघ्नराजं ततः पश्चात् तु दिक्पतीन् ॥ ११ ॥
इन्द्रादीन् अर्चयित्वा तु बलिशेषं विनिक्षिपेत् ।
प्राकाराद् बाह्यदेशं तु निर्गम्य [छ]प्रक्षिपेद् बलिम् ॥ १२ ॥
गोमयेनोपलिप्तेषु भूप्रदेशेष्वथाष्टसु ।
कुमुदादींस्तु संस्थाप्य[12] पूजयित्वा बलिं हरेत् ॥ १३ ॥
कोटिसंख्यगणैर्युक्तान्[13] पूज्य पश्चाद् बलिं हरेत् ।
कुमुदं कुमुदाक्षं[ज] च पुण्डरीकं च वामनम् ॥ १४ ॥
शङ्कुकर्णं सर्वनेत्रं सुमुखं सुप्रतिष्ठितम् ।
प्रत्येकं नृत्य[14]गीताद्यैरेकैकं तोषयेद् गुरुः[झ] ॥ १५ ॥

[8] गर्भं is omitted in A, B.;...स्थापयेदर्चां—D. देवं—K. [ख] ...चाथ—D. [ग] द्विजातेश्च—K. [घ] यायादन्योन्य—D, E, F. [ङ] गृह्यान्यस्त्वनुगच्छति—K. [9] पुरौ—A; पुरो—D. [10] पटहैः—A, D. [च] तु—K. [11] महेश्वरम्—A, D, K. [छ] ततप्राकाराद् बाह्यदेशं निर्गम्य—A, B. [12] संपूज्य—C. [13] ...र्युतैः—C; युक्ताः—A, B. [ज] कुमुदाख्यं—K. [14] नृत्यगेयाद्यै:—A. [झ] बुधाः—K.

बलिपीठं ततः प्राप्य तोयेन क्षालयेत् सुधीः ।
"नमोऽस्तु पार्षदेभ्योऽथ" इति मन्त्रं समुच्चरन् ॥ १६ ॥
प्रयच्छेत् तु[15] बुधो यत्नाच्छेषमन्नं जलप्लुतम् ।
तदाचम्य शुचिर्भूत्वा देवागारं प्रविश्य च[16] ॥ १७ ॥
मन्त्रेण क्षाप्य[अ] तां मूर्तिं पादपीठे निधापयेत् ।
मन्त्रान् संहृत्य विन्यस्तान् निर्माल्यं प्रक्षिपेत् ततः ॥ १८ ॥
विष्वक्सेनाय देवाय बलिः[17] साधारणस्त्वयम् ।
बलिदानक्रियाद्येषु सर्वकर्मसु कारकः ॥ १९ ॥
देशिकाय प्रदद्यात् तु गां च वस्त्रं सकाञ्चनम् ।
पुनरन्यप्रकारेण सविशेषं बलिं शृणु ॥ २० ॥
पूर्ववत् पात्रमानीय तथैवान्नं चतुर्विधम् ।
अष्टाङ्गुलोच्छ्रितं कुर्यात् सूचाग्रं[ट] पञ्चविस्तृतम् ॥ २१ ॥
विन्यसेत् काञ्चनं रूप्यं पूर्वोक्तविधिना बुधः ।
वासुदेवं ततो न्यस्य न्यसेन्मासाधिपांस्ततः[18] ॥ २२ ॥
गन्धाद्यैस्तानर्चयित्वा पूर्ववन्निर्गमक्रिया ।
पूर्वोक्तेनैव मन्त्रेण[19] बलिदानं ततस्ततः ॥ २३ ॥
आचम्य[20] दर्शयेद् यत्नाद् बलिं देशिकसत्तमः ।
तोषयेत् पूर्ववद् यत्नाद् गीतनृत्यैस्तु तान् सुरान् ॥ २४ ॥
भ्रामयित्वा तु [ठ]शनकैः प्रविशेद् देवसन्निधौ ।
पूर्ववत् संहरेन् मन्त्रान् न्यस्तान् वै[21] देशिकोत्तमः ॥ २५ ॥
विष्वक्सेनाय संक्षिप्य[22] निर्माल्यं निक्षिपेत् ततः ।
एवंविधो बलिर्नित्यं भगवद्भिरभीप्सितः[23] सदा ॥ २६ ॥

[15] प्रयच्छेत—A, D. [16] तु—B, C. [अ] स्थाप्य—A, B, C, D. [17] तथा—C ; बलिं साधारणं क्षिपेत्—K. [ट] चक्रं—K. [18] स्तथा—B, C. [19] पूर्वोक्तेन क्रमेणैव—C, K. [20] आनाय्य—C.; आचार्यं—F.; आन्योन्यं—D. आचम्य—omitted in A, B. [ठ] एवं भ्रमित्वा—K. [21] तान् एव—B, C. न्यस्याद् व—K. [22] निक्षिप्य—A, D. [23] एवंविधं बलिं नित्यं भगवद्भिश्च सर्वदा—K.

कार्यः प्रतिष्ठादिवसमारभ्यानुदिनं[24] नरैः ।
— — — — ॥ २७ ॥

॥ ४१ ॥ इति हयशीर्षे[ङ] महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे एकचत्वारिंशत्तमः बलिदानपटलः ॥ ४१ ॥

द्विचत्वारिंशत्तमः पटलः

श्रीभगवान् उवाच—

अतःपरं प्रवक्ष्यामि द्वारस्य[1] सुरसत्तम ।
प्रतिष्ठां विष्णु[2]सायुज्यद्वारभूतां यथाविधि ॥ १ ॥
सुवर्णं तु[क] अधो दत्त्वा प्रतिद्वारं निवेशयेत् ।
तदा प्रतिष्ठिते विष्णौ प्रतिष्ठा द्वारजा भवेत् ॥ २ ॥
द्वारबन्धं[3] विना यत्र वासुदेवः प्रतिष्ठितः ।
तदा पश्चाद् बुधैः कार्या प्रतिष्ठा द्वारजा द्विज ॥ ३ ॥
अथ कृत्वा द्वारबन्धं[4] प्रतिष्ठा क्रियते नरैः ।
अत्रादौ[5] विधिवद् द्वारप्रतिष्ठां कारयेद् बुधः ॥ ४ ॥
शाखोदुम्बरकौ सिच्य[6] अष्टभिः कलसैः शुभैः ।
रत्नौषधियुतौ विप्र वस्त्र[7]युग्मेन वेष्टयेत् ॥ ५ ॥
गन्धादिभिः समभ्यर्च्य मन्त्रैर्वेदादिभिर्गुरुः ।
"धूरसी" ति च संधूप्य नैवेद्यं विनिवेदयेत्[8] ॥ ६ ॥

[24] ...दिवं—B, C. [ङ] हयशीर्षप्रोक्ते—K. [1] श्रीवासा—C. [2] विष्णुं—A, B.; द्वारं—C. [क] सुवर्णानि—A, B, C, D. [3] ...यन्त्रं—C. [4] ...यन्त्रं—C. [5] अथादौ—C. [6] माखोत्वमुकौ विप्र—C...विप्र—D, F. [7] स्नाप्य—C. [8] विनिवेशयेत्—C.

कुण्डेषु होमयेद् वह्निं समिल्लाजतिलादिभिः ।
गोपुरं वर्धयेद्[ख] यत्नात् पदान्त[9]स्थामरैः पदैः ॥ ७ ॥
तत्रार्चयेत् सुरौ द्वौ द्वौ प्रागादिषु यथाक्रमम् ।
इन्द्रसूर्यादियोगेन मध्यगौ[10] द्विजसत्तम ॥ ८ ॥
कुशपुष्पाक्षतैर्भक्त्या* शय्यादीनि[11] च दापयेत् ।
आधारशक्तिं तत्राधो न्यसेद् देशिकसत्तमः ॥ ९ ॥
शाखयोर्विन्यसेन् मूले देवौ चण्डप्रचण्डकौ ।
ऊर्ध्वोदुम्बरके[12] देवीं लक्ष्मीं सुरगणार्चिताम्[13] ॥ १० ॥
न्यस्याभ्यर्च्य यथान्यायं श्रीसूक्तेन द्विजोत्तमः ।
होमयेत् श्रीफलैः साष्टशतं घृतपरिप्लुतम् ॥ ११ ॥
"आदित्यवर्णे" त्यनया ऋचा मूलेन वा द्विजः ।
ततः[14] पूर्णाहुतिं दत्त्वा भोजयेद् वैष्णवान् द्विजान्[15] ॥ १२ ॥
सुवर्णशृङ्गीं विधिवत् प्रदद्यात् सुसमाहितः ।
तथैवाभरणं भक्त्या दद्यात् सर्वाङ्गिकं शुभम् ॥ १३ ॥
एवं सन्तोष्य विधिवत् प्रियप्रश्नेन चैव हि ।
आचार्यदक्षिणां दत्त्वा[16] मूर्तिपान् अपि पूजयेत् ॥ १४ ॥
गोहिरण्यादिदानेन प्रियप्रश्नेन सर्वथा ।
एवं कृत्वा ततः पश्चात् नृत्यं गेयं च[17] कारयेत् ॥ १५ ॥
एषा संक्षेपतः प्रोक्ता प्रतिष्ठा ते मयानघ ।
पूर्वमेव[18] स्थापितस्य द्वारस्य कमलोद्भव ॥ १६ ॥
आदौ देवप्रतिष्ठा स्यात् पश्चाद् द्वारस्य कारयेत्[19] ।
तत्र संप्रोच्यमानं मे[20] विशेषं शृणु पद्मज ॥ १७ ॥

[ख] वर्तयेद्—K. * कुशपुष्पादिभिभक्त्या—F. [9] पादान्त—C. [10] मध्यमौ—C, F. [11] शक्त्यादीनि—C. [12] ऊर्ध्वोदुम्बरके is omitted in C. [13] ...चितम्—C. [14] अतः—B, C. [15] वैष्णवान् भोजयेद् द्विजान्—A, B, F. [16] दद्यात्—B, C. [17] गीतं च—B, C. नृत्यगीतं—K. [18] .. मेवास्थापितस्य—A. [19] आदौ द्वारप्रतिष्ठा स्यात् पश्चाद् द्वारस्य कारयेत्—B, C, D.; आदौ द्वारप्रतिष्ठा स्यात् पश्चाद् देवस्य कारयेत्—F. ...देवस्य वा भवेत्—K. [20] तत्रैव प्रोच्यमानस्य—B.; तत्रैव प्रोच्यमानं मे—C. तत्रेदं प्रोच्यमानं—K.

चतुःषष्टिपदं कृत्वा द्वारदेशं विचक्षणः।
अभ्यर्च्य[ग] देवताः सर्वा द्वारद्रव्यमुपाहरेत् ॥ १८ ॥
काषाय[घ] -गन्ध-तोयैश्च सर्वौषधिजलैस्तथा।
अवलिप्य स्नानमन्त्रैर्गन्धपुष्पाधि[21]वासितम् ॥ १९ ॥
वेष्टितं वस्त्रयुग्मैस्तु[22] कृत्वा मन्त्रेण मन्त्रितम्।
आधारशक्त्याद्युपरि पञ्चरत्नानि विन्यसेत्[23] ॥ २० ॥
उदुम्बरं न्यसेत् तस्मिन् ऊर्ध्वं रत्नानि विन्यसेत्।
